Sampath_eBooks

THE

Kashmir Series of Texts and Studies.

No. LI.

THE SVACCHANDA TANTRAM

WITH COMMENTARY

BY

KSHEMARAJA.

EDITED

BY

PANDIT MADHUSŪDAN KAUL SHĀSTRĪ, M. A., M. O. L.

VIDYĀVĀRIDHI, M. R. A. S.

Director Research & Archæological Departments,

JAMMU & KASHMIR GOVERNMENT,

SRINAGAR.

Published under the Authority of the Government of

His Highness Rājarājes'vara Mahārājādhirāja

S'ri MAHĀRĀJA HARISINGHJI BAHĀDUR,

G. C. I. E., K. C. V. O.,

MAHĀRĀJA OF JAMMU AND KASHMIR.

Volume V

(Part A)

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

BOMBAY:

PRINTED AT THE 'NIRNAYA SAGAR' PRESS

1930. A. D.

Sampath_eBooks

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेशान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥
तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

Sampath_eBooks

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५१

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमाहेश्वराचार्यवर्य-श्रीक्षेमराजकृतोद्द्योताख्य-टीकोपेतम् ।

श्रीराजराजेश्वर-महाराजाधिराज-कश्मीरनरेन्द्र-श्रीहरिसिंहजी-बहादुराज्ञया

रिसर्च-आर्क्यालोजी-इत्यादि-कार्यालयाध्यक्ष-पण्डित-मधुसूदनकौल-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संशोधनादिसंस्कारणोत्तरं

संपाद्य

मुम्बय्यां 'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतम् ।

पञ्चमो भागः (पूर्वार्धम्)

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९८७. काश्मीर-श्रीनगर खैस्ताब्दः १९३०.

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

Sampath_eBooks

(All rights reserved.)

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
26-28, Kolbhat Lane, Bombay.

Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L.
for the Research Department,
Jammu and Kashmir Government, SRINAGAR.

Sampath_eBooks

अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्योताख्य-
विवरणोपेतम् ।

(दशमः पटलः)

आ कालाग्नेः शिवपुरपरो योऽयमध्वा स सर्वो
मूर्त्याभासा स्फुरति लहरी यस्य यश्चाखिलं तम् ।
मेयत्वेन प्रथयति परां मातृतां भक्तिभाजां
व्यक्तुं देवो जयति स महाभैरवः श्रीस्वतन्त्रः ॥

नवमपटलोपान्ते कालाग्निरित्यादिना कटाक्षिताध्वस्वरूपावबोधार्थं श्रीदेव्युवाच

अध्वायं तु महादेव
सूचितो नतु वर्णितः ।
कथयस्व प्रसादेन
साधकानां हिताय तम् ॥ १ ॥

पारमेशधामप्राप्त्युपायः प्रबुद्धैरदनीयश्चाध्वा अयमिति नवमपटलोपक्रान्तो भुवनात्मा, सा-

Sampath_eBooks

धकानामिति भुक्तिं मुक्तिं च साधयतामाचार्यादीनाम् ॥ १ ॥

एतत्प्रश्ननिर्णयं श्रीभैरव उवाच

अध्वानं संप्रवक्ष्यामि
साधकानां हिताय वै ।

अध्वानमिति भुवनरूपं, सम्यक् तत्तद्भुवनेशाधिष्ठितक्रमेण प्रकर्षेण वैतत्येन वक्ष्यामि ॥

तं प्रस्तौति

अथ कालाग्निरुद्राधः
कटाहः संव्यवस्थितः ॥ २ ॥
कोटियोजनबाहुल्यः

पृथ्व्याः सर्वतत्त्वावृतत्वात् तदीयब्रह्माण्डान्तरवस्थितं कालाग्निरुद्रभुवनमादौ, तस्याधः कटाहो ब्रह्माण्डकर्परः कटाह इव च यत्र निमज्ज्योन्मज्ज्यते कृच्छ्रात् । बाहुल्यं घनता ॥

किंच

तस्योर्ध्वे भुवनानि तु ।
नवनवतिकोट्यश्चा-

Sampath_eBooks

प्यण्डानां तु सहस्रकम् ॥ ३ ॥
कोटीनां सप्ततिर्लक्षा-
ण्ययुतानां सहस्रकम् ।
अर्बुदान्यथ वृन्दानि
खर्वाणि च तथैव च ॥ ४ ॥
पद्मानि चाप्यसंख्यानी-
त्येवमादीन्यनेकशः ।
तेषां वै नायको ह्यत्र
त्वनन्तः परमेश्वरः ॥ ५ ॥

तस्य कटाहस्योर्ध्वे पृष्ठे कर्परबाह्ये इत्यर्थः । नवनवतिकोट्य इत्यादिना तद्बहिर्वर्तिनां भुवनानां ब्रह्माण्डानां च निःसंख्यत्वमुच्यते । यथोक्तं श्रीमालिनीविजये ब्रह्माण्डं प्रकृत्यण्डं चाधिकृत्य

'पृथग्द्वयमसंख्यातम्··········· ।' (२।५०)

इति । श्रीकण्ठसंहितायामपि

'ब्रह्माण्डं कोटिविस्तीर्णम्··············· ।'

इत्युक्तम् । यत्तु टीकाकारैः

'अथ कालाग्निरुद्राधः················· ।'

Sampath_eBooks

इत्यत्र कालाग्निरुद्रभुवनसामीप्यादाद्यं पार्थिव-मनन्तभुवनमुक्तम्, अण्डानामित्यत्र चाण्डशब्देन भुवनान्युच्यन्ते, तेषां च कालाग्निब्रह्माण्डकवाटयोर्मध्यवर्तित्वमिति व्याख्यातं, तदनागमिकं स्वयंकल्पितमित्युपेक्ष्यम् । यतोऽनन्तभुवनस्य प्रथमत्वेऽपि शतरुद्रमध्यवर्तित्वेनाण्डबाह्याधोभागगतत्वमेव आगमेषु दृश्यते । यथोक्तं श्रीमालिनीविजये

'तद्बहिः शतरुद्राणां भुवनानि पृथक्पृथक् ।' (५।१२)

इत्युपक्रम्य

'अनन्तः प्रथमस्तेषां············ ।' (५।१३)

इति । इहापि एकादशे भविष्यति

'अनाथोऽनन्तरूपेण स्थितश्चाध्वनि धारकः ।' (२१)

इति । तथा

'संस्थितश्चाम्भसो मूर्ध्नि शक्त्याधारस्तु हूहुकः ।' (२३)

इति । एतच्चानन्तरमेव व्यक्तीभविष्यति । अण्डशब्दस्य च भुवनवाचकत्वमप्रसिद्धम् । एवमपि पृथक् भुवनशब्दोऽनुपादातव्यः स्यात् । वक्ष्यमाणे च ब्रह्माण्डान्तर्वर्तिभुवनमानसंख्यामध्ये अनन्तभुवनमानस्यानुद्देशात् न कर्परि-

Sampath_eBooks

काकालाग्निभुवनयोर्मध्ये अनन्तभुवनम्, अपित्वधःकर्परिकाबाह्यपृष्ठभागे अधःस्थशतरुद्रदशकमध्ये इत्यलम् ॥ ५ ॥

तदित्थं प्रपञ्चव्याप्त्या अनन्तब्रह्माण्डाश्रया भूः। तस्यात एव अनन्तशब्दवाच्यस्य भगवतः शुद्ध्या सर्वब्रह्माण्डाधोवर्तिनिःसंख्यभुवनशुद्धिरूहकाख्यैः रुद्रभुवनैः सहास्यां भुवनदीक्षायां संपद्यते इत्याह

तेन शुद्धेन शुद्धानि
त्वण्डान्यत्रोहकैः सह ।

ऊहन्ते तर्कयन्ति परिच्छिन्दन्ति विश्वमित्यूहकाः ॥

कीदृशैरूहकैरित्याह

शक्त्याधाराश्रयैरेव

शक्तिः पारमेश्वर्येव विश्वभित्तिभूतत्वादाधार इवाधारस्तदाश्रयैरेव शक्तिविश्रान्तैरित्यर्थः ॥

ते चोहकाः कियन्तः, कीदृशाः, के इत्याह

द्वात्रिंशत्परिसंख्यया ॥ ६ ॥

Sampath_eBooks

कोटिकोटिपरीवारा-
स्त्वनौपम्यगुणान्विताः ।
दिव्याङ्गनौघसंकीर्णा
भ्रूभङ्गललितेक्षणैः ॥ ७ ॥
सूर्यायुतप्रतीकाशा-
स्तोरणाट्टालमण्डिताः ।

किंच

न तत्र दुःखितः कश्चि-
न्मुक्त्वा दुःखमनङ्गजम् ॥ ८ ॥
रमन्ते तत्र वै वीरा
नारीभिः सह लीलया ।
भुवनेषु विचित्रेषु
योन्याकारेषु संस्थिताः ॥ ९ ॥

अनेन स्त्रैणभोगप्राधान्यमेवैषां भुवनानामुपोद्बलितम् ॥ ९ ॥

तदित्थं

भुवनान्येवमुक्तानि
भुवनान्तरवासिनाम् ।

Sampath_eBooks

'तस्योर्ध्वे भुवनानि' (३) इति यान्युपक्रान्तानि, तानीह अनन्तभुवनमध्यगतेषु भुवनविशेषेषु ये वसन्त्यूहकास्तेषामाश्रयत्वेनोक्तानि ॥

एवं च दीक्षायां

सर्वाणि शुद्धिमायान्ति
तान्यनन्ते विशोधिते ॥ १० ॥

स्वामिनि अनन्तभट्टारके दीक्ष्यं प्रति भोगप्रदत्वान्निवर्तिते तदधिष्ठिता ऊहकास्तद्भुवनानि चानन्तानि शुद्ध्यन्ति न भोगदत्वेन बन्धकानि भवन्तीत्यर्थः । एवमेव चोत्तरत्रापि तत्तद्भुवनेशशुद्धिद्वारेण भुवनशुद्धिर्मन्तव्या । शोधने चोपस्थानादिपूर्वं विधिमग्रे वक्ष्यति । एवं कर्परिकाया बाह्योऽनन्तभुवनम् ॥ १० ॥

ततस्तु

अथोपरिष्टात्कालाग्निः
श्रीकण्ठेन निवेशितः ।
अधिकारं प्रकुरुते
तदाज्ञानुविधायकः ॥ ११ ॥

Sampath_eBooks

अनेकरुद्रकोटीभि-
रुपेतस्तिष्ठति प्रिये ।

उपरिष्टादिति कटाहस्य । कालः संहारकृदाग्नेः । यद्यपि पूर्वोक्तनीत्या स्वतन्त्रभट्टारकमयत्वात् विश्वस्योर्ध्वाधरप्रविभागो नास्ति, तथापि तदिच्छयैवारुरुक्षूणामुपदेश्योपदेशकानामयमित्थमाभासितः क्रमः । कालाग्न्यादिश्च परभैरवमयत्वात् व्यापकोऽपि तदिच्छयैव तथावभासितस्तत्र तत्र तथा तथा संनिविष्टः ॥

एवं कटाहस्याध ऊर्ध्वे च भुवनद्वयमुक्त्वा, पुरप्रमाणं निर्णिनीषुरुपक्रमते

अधुना संप्रवक्ष्यामि
प्रमाणं शिवनिर्मितम् ॥ १२ ॥
योजनानां वरारोहे

तच्चोपक्रमत एव

यथा भवति तच्छृणु ।

तत्र

अव्यक्ताद्दशभिर्भागै-
र्महान्स्थूलो विभाव्यते ॥१३॥

Sampath_eBooks

द्विपञ्चभागो महतो
भूतादिः स्थूल उच्यते ।

इह योगिनः प्रति विश्वं मेयमयोगिनस्तु प्रकृतितत्त्वात्प्रभृति मेयव्यवस्था मायायाः पुरुषं प्रत्याच्छादकत्वात् कलादेश्च कञ्चुकरूपत्वेन ग्राहकशक्तिमयत्वात्। प्रकृतितत्त्वं तु वेद्यसामान्यरूपं मुमूर्षावसरे कण्ठगतमिव स्मर्यमाणं प्रतिभात्येव । कण्ठो हि प्रकृत्यधिष्ठातुः विष्णोः स्थितिधाम। तदित्थं वेद्यरूपादव्यक्ताद्दशगुणं स्थूलत्वं महतो बुद्धेः। बुद्धिर्हि अध्यवसायव्यापाररूपा स्वसंवेदनेन संवेद्यते। तस्याश्च प्रोक्तप्राकृतरूपात् वेद्यात् स्थूलत्वं प्रतीतिसाक्षिकमेव । एवंभूतात् महतो द्विपञ्चभाग इति दशगुण एव, भूतानामादिः कारणं तन्मात्रं स्थूलः, नतु भूतादिरहङ्कारो व्याख्येयस्तस्य महतः आधिक्येनासंचेत्यत्वात् । तन्मात्रस्वरूपं तु वासनारूपतयान्तःस्थितं वृद्धस्येवाभिलाषास्पदीभूतं प्रमदामात्ररूपं स्फुरत्येव । तच्चाध्यवसायात्मनो बुद्धेराकारतया स्फुरत्स्थूलतां धत्त एव ॥

Sampath_eBooks

तदेतदन्तःकरणैकपरिच्छेद्यमित्याह

भूतादेः परिमाणं च
भावग्राह्यं न चाक्षुषम् ॥ १४ ॥

तदीदृशात्

भूतादेर्यद्दशगुण-
मणीयो दृश्यते रजः ।
जालान्तरगते भानौ
परमाणुः स उच्यते ॥ १५ ॥

अणीयः स्वल्पतरं भूताद्यपेक्षया तु दश-गुणं स्थूलं चाक्षुषत्वात् । अयं च परमाणुः तार्किकोपगतपरमाणुविलक्षणः ॥ १५ ॥

ईदृशाश्च

अष्टानां परमाणूनां
समवायस्तु यो भवेत् ।
त्रसरेणुः स विख्यातः
तत्पद्मरज उच्यते ॥ १६ ॥

समवायः संघट्टनम् । तस्य त्रसरेणुः पद्मरजः इति नामद्वयम् ॥ १६ ॥

Sampath_eBooks

त्रसरेणवश्च ये त्वष्टौ
वालाग्रं तु विधीयते ।
वालाग्राणि तथा त्वष्टौ
लिक्षेति परिकीर्तिता ॥ १७ ॥
लिक्षाश्चाष्टौ विदुर्यूकां
यूकाश्चाष्टौ यवो भवेत् ।
अष्टौ यवा वरारोहे
पर्वाङ्गुष्ठमथाङ्गुलम् ॥ १८ ॥
द्वादशाङ्गुलमानेन
वितस्तिस्ताल उच्यते ।
तालद्वयं भवेद्धस्त-
श्चतुर्विंशतिकाङ्गुलः ॥ १९ ॥

वालाग्रादीनि प्रमाणविशेषाभिधानानि । पर्वणः अङ्गुष्ठमङ्गुलमिति पर्यायः, वितस्तेस्तु तालः ॥ १९ ॥

चतुर्हस्तो धनुर्दण्डो
नालिका यूप एव च ।

धनुष एव दण्डो नालिका यूप इति च नाम ॥

Sampath_eBooks

धनुःसहस्रे द्वे पूर्णे
क्रोशः समभिधीयते ॥ २० ॥
क्रोशद्वयेन गव्यूति-
र्गव्यूती द्वे तु योजनम् ।

एतत्प्रकृते योजयति

अनेन परिमाणेन
योजनानां यशस्विनि ॥ २१ ॥
सिंहासनं महादीप्तं
सहस्रद्वयविस्तृतम् ।
सहस्रमुच्छ्रितं तस्य

तस्येति कालाग्नेः ॥

महापीठेषु सुव्रते ॥ २२ ॥
तिष्ठते तत्र देवेशः
कालो द्वादशलोचनः ।

तिष्ठते प्रकाशते ॥

स पश्चिमोत्तरप्राग्दक्षतः
सितरक्तपीतकृष्ण-
श्चतुर्वक्त्रो महाबलः ॥ २३ ॥

Sampath_eBooks

ऊर्ध्ववक्त्रमस्यानुन्मीलितं भगवता दर्शितं मा भूद्ब्रह्मादिलोकदाह इति ॥ २३ ॥

किंच

रक्ताङ्गोऽथ करालश्च
पिङ्गभ्रूश्मश्रुलोचनः ।
वक्त्रज्वाला जटाज्वाला
लोमज्वालाः सुजाज्वलाः ॥२४॥
ज्वलन्त्यस्यायुधज्वालाः
सुतीव्राः करमध्यगाः ।

इत्थं चायं

ज्वलत्पर्वतवद्दीप्तो
ज्वलज्ज्वालाभिराजितः ॥२५॥
दशबाहुर्महात्मा वै
खड्गखेटकधारकः ।
शरशार्ङ्गविहस्तश्च
पाशाङ्कुशधरस्तथा ॥ २६ ॥
कपालखट्वाङ्गधरो
वरदाभयपाणिभृत् ।

Sampath_eBooks

विहस्तो विशिष्टहस्तः ॥

अपिच

दश योजनलक्षाणि
शरीरं भाति भास्वरम् ॥ २७॥

एतद्भास्वरायाः कान्तेः प्रमाणं, नतु शरीरस्यान्यथा प्रागुक्तासनमानस्यासंगतत्वापत्तिः । शरीरमानं त्विह नोक्तम् ॥ २७ ॥

कोटियोजनमानेन
भुवनं चास्य जाज्वलम् ।

तच्च

संभृतं रुद्रकन्याभी
रुद्रैर्ज्वलितशूलिभिः ॥ २८ ॥
नानारूपविमानैश्च
प्रज्वलद्भिः समावृतम् ।

किंच

ज्वालास्तस्य विनिष्क्रान्ताः
कोटयो दश चोर्ध्वतः ॥ २९ ॥

तस्येति भुवनस्य ॥ २९ ॥

Sampath_eBooks

तस्योपरिष्टाद्देवेशि
पञ्च कोट्यो वरानने ।
न कश्चिन्निवसत्यत्र
धूमोष्मपरिवारितः ॥ ३० ॥

एवं कटाहः कोटिस्तदुपरि कालाग्निभुवनं कोटिः, भुवनज्वाला दश कोटयः, शून्यं पञ्च कोटयः इति सप्तदश । नचात्र मध्ये अनन्तभुवनपरीमाणमुक्तमिति मध्ये तत्परिकल्पनमसदित्युक्तमेव ॥ ३० ॥

अतः परं वरारोहे
नरकाः परिकीर्तिताः ।
पञ्चाशत्कोटयो देवि
कथिता ह्यनुपूर्वशः ॥ ३१ ॥

अन्तर्भावितण्यर्थत्वात् नरान् काययन्ति साक्रन्दान्संपादयन्ति दुःखानुभवेनेति नरकाः कथिता इति महासंहितासु ॥ ३१ ॥

इह तु

प्रधानं संप्रवक्ष्यामि
शतं तत्र वरानने ।

Sampath_eBooks

चत्वारिंशत्समोपेतं
कथितं
यन्महासंहितासु तत्
नामतः शृणु ॥ ३२ ॥

अवीची रौरवश्चैव
महारौरव एव च ।
तामिस्रश्चान्धतामिस्रः
संजीवनसुजीवनौ ॥ ३३ ॥

तदेते

'अवीचिर्वीचिभिश्छन्नः पूयासृकर्दमादिभिः ।
रुदन्तः प्राणिनो यत्र निक्षिप्यन्ते स रौरवः ॥
तामिस्रस्तमसा मिश्रः शर्वरीध्वान्तधूसरः ।
तथारूपोऽन्धतामिस्रस्त्वविभावितदिङ्मुखः ॥'

इति श्रीपरायां निरुक्ताः। रौरव एव सातिशयो महारौरवः । यातनाभिर्मृतकल्पानां पुनर्यातनार्थं यत्र सम्यग्जीवनं, सुष्ठु भूयोभूयश्च जीवनं तौ संजीवनसुजीवनौ ॥ ३३ ॥

पद्मश्चैव महापद्मः
कालसूत्रस्तथैवच ।

Sampath_eBooks

एते च श्रीपरायां

'पद्मः पद्मसमाकारः सुशीतो हिमकर्दमः।
महापद्मस्तथारूपः किन्तु शीतहिमोत्तरः॥
कालसूत्रोऽसितः पाशस्त्रिकण्टदृढवेष्टनः।'

इति निरुक्ताः॥

सूचीमुखः

एषोऽपि

'सूचीमुखः सुतीक्ष्णाग्रसूचीवत्प्रविभेदकः।'

इति तत्रैवोक्तः॥

महाकायः

महान् दुर्वाहः कायो यत्र॥

क्षुरधारोऽसिपर्वतः॥ ३४॥

'क्षुरधारो लुनात्यङ्गं क्षुरधारानिरन्तरः।'

इत्युक्तः। असिः खड्गस्तन्मयश्च पर्वतो गच्छतां दुःखदः॥ ३४॥

असिस्तालो द्रुमश्चैव
द्रुममस्तक एव च।
द्रुमारामश्च विख्यातः

असिसंज्ञः

Sampath_eBooks

'खड्गश्छिनत्ति गात्राणि खड्गधारापरिग्रहः ।'

इति परायां निरुक्तः । तालोऽपि

'तालस्तालवदङ्गस्थैर्विदारयति वल्कलैः ।'

इति निरुक्तः । द्रुमो दारुणवाताभिभवनीयद्रुमाकारो निश्चलदेहहेतुः । द्रुमो मस्तके यत्र स द्रुममस्तकः । एवं द्रुमाणामारामः समूहो यत्र अङ्गेषु स द्रुमारामः ॥

कुम्भीपाकस्तथैव च ॥ ३५ ॥

'कुम्भीपाको बृहद्घोरः कुम्भवक्त्रोज्ज्वलच्छिखः ।'

इति निरुक्तः ॥ ३५ ॥

अम्बरेषोऽङ्गारराशिः

'अम्बरेषोऽम्बरायसात्सुतीक्ष्णेषून्प्रवर्षति ।
तप्ताङ्गारोऽग्निसंकाशो लोहाङ्गारनिकेतनः ॥'

इति निरुक्तावेतौ ॥

तीक्ष्णतुण्डस्तथैव च ।
वज्रतुण्डश्च शकुनिः

एवंविधशकुनिभिर्जना यत्र ताड्यन्ते ॥

मीनोदरखरोदरौ ॥ ३६ ॥

Sampath_eBooks

मीनखरयोरुदरे महासंतापदे यत्र जनाः पीड्यन्ते ॥ ३६ ॥

सन्दंशः

सन्दंशो यत्र संततैः सन्दंशैर्जनाः पीड्यन्ते ॥

वज्रकायश्च

यत्र महायातनानुभववतां वज्रमयः कायः ॥

मेदकश्च वरानने ।

यत्र महासंतापवति मेदोमयशरीरता ॥

उष्ट्रग्रीवो महाकायो
वेतालो वडवामुखः ॥ ३७ ॥

उष्ट्रस्येव अतिदीर्घत्वात् कृच्छ्रेणाशनीयप्रापणी ग्रीवा, कायश्च महान् बह्वन्नभरणीयः, वेताला ज्वालास्या भयानका यत्र । वडवामुखाकारो दारुणोऽनलः संतापनो यत्र ॥३७॥

असृक्पूयह्रदश्चैव

असृग्ह्रदः पूयह्रदश्च ॥

भ्रमरो मषकस्तथा ।

यत्र भ्रमरा मषकाश्च विषमा दंशकारिणः॥

Sampath_eBooks

संग्रहश्च

यत्र तप्तोदकवज्जनाः संगृह्यन्ते क्वाथ्यन्ते ॥

कपालश्च

यत्र कपालेष्विव अपूपाः जनाः पच्यन्ते ॥

तप्तकवच एव च ॥ ३८ ॥

यत्र तप्तकवचान्तर्निविष्टानि अङ्गानि पीड्यन्ते ॥ ३८ ॥

गजपादो महावक्रः

कूर्माख्यो नकुलस्तथा ।

यत्र गजपादैः जनाः पीड्यन्ते । यत्र महावक्रैः प्राणिभिः ग्रसनम् । यत्र कूर्मैर्नकुलैश्च जना भक्ष्यन्ते त्रास्यन्ते च ॥

पीडनश्चैव

यत्र महाशिलाभिर्जनाः पीड्यन्ते ॥

कुम्भीरः

एतन्नाममहाजलचरभीषणः ॥

क्रकचः शूलमेव च ॥ ३९ ॥

यत्र क्रकचैरङ्गच्छेदनम् । यत्र च शूलारोपणम् ॥ ३९ ॥

Sampath_eBooks

अनङ्गश्चाङ्गारोद्गारः

यत्र तापेन अङ्गानि विलीयन्ते । यत्र च अङ्गारोद्गारैः महोष्मभिः संतापः ॥

प्रदीप्तस्त्रिमुखस्तथा ।

पञ्चवक्त्रः शतास्यश्च

प्रदीप्तोऽन्यत्र

'अन्तःसंतापकृत्तापः शोषितोदरकन्धरः ।'

इत्युक्तः । त्रिपञ्चशतमुखाश्च प्राणिनो यत्र दशन्ति ॥

जलौको बिलधूमकः ॥ ४० ॥

यत्र जलौकःसमाख्यैः प्राणिभिरुपद्रवः । यत्र च धूमबहुलेषु बिलेषु जन्म ॥ ४० ॥

सुतप्तो जतुपङ्कश्च

'सुतप्तस्तापकृत्प्रोक्तः केवलोज्वलितानलः ।
जतुपङ्को ज्वलल्लाक्षाप्रलेपप्लुष्टविग्रहः ॥'

इति श्रीपरायां निरुक्तः ॥

घोररूपोऽतिदारुणः ।

यत्र घोररूपा भीषयन्ते, अत एवातिदारुणोऽयम् ॥

Sampath_eBooks

अस्थिभङ्गः पूतिमांसः

यत्र अस्थ्नां भङ्गः । यत्र च पूतिमयमांसदेहता ॥

द्रव्यश्चैव त्वमेध्यकः ॥४१ ॥

यत्र द्रव्ये बहुमूत्रमध्ये अमेध्यमध्ये च निवासः ॥ ४१ ॥

उलूकः परशुर्दण्डः

काकाख्यश्च तथैव च ।

यत्रोलूकैर्भक्षणं, परशुना छेदः, दण्डैस्ताडनं, काकैश्च भक्षणं जनानाम् ॥

सोच्छ्वासश्च निरुच्छ्वासः

'सोच्छ्वासः श्वसनप्रायो निश्चेष्टकृतकाश्रयः ।
निरुच्छ्वासोऽक्षसंरोधान्निरुच्छ्वसनलक्षणः ॥'

वृकास्यश्च तथैव च ॥ ४२ ॥

अश्वास्यो गोपलादश्च

महतां वृकाणां सृगालानामश्वानां च भक्षणार्थमास्ये यत्र जनाः सृज्यन्ते । गावः पशवः पलं मांसमदन्ति यत्र । यदुक्तं

'मांसादः सर्वदेहस्थसर्वमांसापकर्षकः ।'

इति ॥

Sampath_eBooks

अलोको दहनस्तथा ।

यत्राविद्यमानोऽन्यो लोकः । यश्च दहनः

'उष्णोऽत्युष्णज्वरारम्भः सर्वाङ्गपरितापकः ।'

इत्यन्यत्रोष्ण इति प्रोक्तः ॥

श्ववक्रोऽथ दवाग्निश्च

श्ववक्रः श्ववक्रवान् । दवाग्निमध्ये जन्म यत्र ॥

क्षारकूपस्तथा

यत्र क्षारमये कूपे जनाः क्षिप्यन्ते ॥

तमः ॥ ४३ ॥

'तमःसंज्ञो महामोहश्चैतन्यगुणमोहकः ।'

इति निरुक्तः ॥ ४३ ॥

अहीनां निचयश्चैव

भयानककृष्णसर्पमयः ॥

तप्तपाषाण एव च ।

'सुदाहकृज्ज्वलल्लोहपाषाणपरिपूरितः ।'

इति निरुक्तः ॥

विरूपो रूपवांश्चैव

Sampath_eBooks

वैरूप्यप्रद एकः । रूपवद्दुर्लभाभिलषणीयजनदर्शनसंभाषणाभ्यां दुःखासिकाप्रदो द्वितीयः ॥

चित्री चित्रधरस्तथा ॥ ४४ ॥

चित्रं श्वित्रिवच्छबलरूपं मुहुर्मुहुरन्यदन्यत् यत्र भूम्ना जुगुप्सापदं जायते । चित्रधरस्तु यत्र जन्तोः चित्रमेकमेव रूपम् ॥ ४४ ॥

कृष्णपिङ्गलरक्तास्यः

कृष्णं पिङ्गलं रक्तमास्यमतीव विभीषणं यत्र ॥

महिषो राक्षसस्तथा ।

यत्र भीमैर्महिषैः राक्षसैश्च वित्रास्यमाना जायन्ते ॥

कुब्जः

कुब्जा एव यत्र जायन्ते ॥

उत्तप्ततैलाख्यः

उत्तप्तं तैलमङ्गेषु निषिच्यते यत्र ॥

अशनी वृष्टिमुद्गरौ ॥ ४५ ॥

वृष्टिमुद्गरावशनिरूपौ यत्रोपरिष्टात्पततः॥४५॥

Sampath_eBooks

मुसलः

मुसलवृष्टिः ॥

अनातपश्चैव

अनातपः शीत इत्युक्तः । तथाच श्रीपरायां

'शीतः शीतज्वरारम्भः समस्ततनुतापकृत् ।'

इति ॥

यमलाद्रिस्तथैव च ।

'युग्माद्रिः कर्कशाश्माद्रिः सन्दंशपरिपीडितः ।'

इत्युक्तः ॥

क्रिमिकूटः

'क्रिमीणां निचयः प्रोक्तः केवलक्रिमिसञ्चयः ।'

इत्युक्तः । तन्मध्ये यत्र जन्मेत्यर्थः ॥

बहुशाखः

शाल्मलिश्च फडिस्तथा ॥४६॥

निगडो लोहरज्जुश्च

लोहपञ्जर एव च ।

फडिः पादबन्धो, निगडः शृङ्खलैकदण्डादिबन्धः, लोहरज्जुः सर्वत्र बन्धाय । एवं लोहपञ्जरः सर्वगात्रनिश्चेष्टत्वोत्पादनाय ॥

Sampath_eBooks

तनुभेदश्चोरगश्च
वृश्चिकः काल एव च ॥ ४७ ॥

यत्र तनोर्देहस्य भेदः चूर्णनम् । यत्रोरगैर्जना बाध्यन्ते । यत्र वृश्चिकैः दश्यन्ते । कालः संहर्तृ-पुरुषपूर्णः ॥ ४७ ॥

वज्रकणः कटाहश्च

तप्तवज्रकणपतिताः कटाहपतिताश्च यत्र जनाः ॥

पट्टः

यत्र तप्तैर्लोहपट्टैर्नरा निबध्यन्ते । एष च लोहस्तम्भ इत्यन्यत्रोक्तः । यदुक्तं

'लोहस्तम्भो ज्वलल्लोहपट्टकप्लुष्टविग्रहः ।'

इति ॥

संकुल एव च ।

यत्र संकुले स्थाने निःस्पन्दतयाङ्गक्लेशः ॥

घोरश्चाजगरश्चैव

यत्र घोरा अजगरा ग्रसन्ते ॥

महावैतरणी तथा ॥ ४८ ॥

Sampath_eBooks

'वैतरण्यां वितार्यन्ते जन्तवः पूयपूरिताः ।
तस्मादसौ नदी घोरा दुर्गन्धा तु वहेत्सदा ॥'

इति । वितारणं पिपासातुराणां जलभ्रान्तिजननम् ॥ ४८ ॥

गृध्रश्च कुररश्चैव
कुक्कुटश्च प्रमर्दकः ।

गृध्राद्यभिधहिंस्रपक्षिसंकुला एते चत्वारः ॥

कर्दमः

यत्र कर्दममध्ये मग्ना जायन्ते ॥

दुर्दुरश्चैव
लम्बोष्ठो वज्रनासिकः ॥४९॥

चिपिटः खञ्जरीटश्च

दुर्दुरो मण्डूकबहलः । लम्बोष्ठादय एतद्रूपभयानकप्राणिबहुला नरकाः । खञ्जरीट एतन्नामकोपघातकपक्षिपूर्णः ॥

शवलो नील एव च ।

शवलो विचित्रो नीलो नीडो यत्र ॥

काकः

विषमकाकपूर्णः ॥

Sampath_eBooks

कङ्कमुखश्चैव

कङ्कः सन्दंशः, तदाकारमुखपक्षिमयः ॥

शिवारावस्ततः परः ॥ ५० ॥

यत्र शिवाभिरारावैर्जना: त्रास्यन्ते ॥५०॥

गजनादो महानादः
सिंहनादस्तथैव च ।

स्पष्टार्था एते त्रयः ॥

महाग्राहस्तथा नक्रो
मूषिकाकीटसागरः ॥ ५१ ॥

ग्राहा अतिक्रूरा नक्राख्यजलचरविशेष-व्यतिरिक्ताः प्राणिनः, ते महान्तो यत्र स महाग्राहः । तथा नक्र इति महानक्रः । मूषि-कामयः सागरः । कीटसागरः सूक्ष्मक्रिमिब-हुलामेध्यसागरः यस्तु श्रीपरायां

'विण्मूत्रो विट्टिलाशीर्णचूर्णास्रकृतपूरणः ।'

इत्युक्तः ॥ ५१ ॥

अवाक्शिराः

अवाक् अधः शिरः, ऊर्ध्वं तु पादौ यत्र ॥

Sampath_eBooks

त्रिरावर्तः

त्रिरावर्तन्ते समन्तात् प्रवर्तन्ते यत्र । यदुक्तं श्रीपरायां

'त्रिर्निवासः पिपासार्तिबुभुक्षापीडितोदरः ।'

इति ॥

चक्रपीडनकस्तथा ।

यत्र तिलवज्जनाश्चक्रेण पीड्यन्ते ॥

त्रपुलेपस्त्रपुकूपः

गलितत्रपुणा तप्तेन यत्राङ्गानि लिप्यन्ते । यत्र च तादृगेव कूपः ॥

इक्षुयन्त्रः

यत्र इक्षुवज्जनाः पीड्यन्ते ॥

गिरेर्लता ॥ ५२ ॥

गिरिप्रभवाभिर्विषलताभिर्यत्र जनास्ताड्यन्ते ॥

कटङ्कटश्च विख्यातः

एतन्नाममहाकटाहप्रख्योऽतिविषमः कूपः ॥

तप्तवालुक एव च ।

Sampath_eBooks

यत्रातितप्तासु वालुकासु पापीयांसः संचार्यन्ते ॥

तदेते सचत्वारिंशच्छतसंख्याताः

एतेऽतिघोरा नरका-
त्रिकोणाः परिकीर्तिताः ॥५३॥

नरकदेशानां संस्थानतस्त्रिकोणत्वमित्यर्थः ॥

एते च

असत्कर्मरतानां च
प्राणिनां पातनाय तु ।

असत् एकादशपटलवक्ष्यमाणात् सामान्यविशेषात्मनः स्वस्मात् शास्त्राद्बहिष्कृतम् ॥

विशेषतस्तु

निस्त्रिंशकर्मकर्तॄणां
शठानां पापिनां तथा ॥ ५४ ॥

निस्त्रिंशकर्म परवधादिकं, शठानां निवारणयापि अनिवर्तमानानाम्, अत एव प्रागर्जितादेव पापसंस्कारात्पुनरपि पापिनामित्याह ॥

इत्थं चैषां

Sampath_eBooks

निर्दयाधमजातीनां
परहिंसारतात्मनाम् ।

तथा

परदाररतानां च

विशेषतः

शिवशास्त्रस्य दूषिणाम् ॥५५॥

देवद्रव्यापहर्तॄणां
ब्रह्मघ्नपितृघातिनाम् ।
गोघ्नानां च कृतघ्नानां
मित्रविस्रम्भघातिनाम् ॥ ५६ ॥

कृतमुपकारं घ्नन्तीति कृतघ्नाः । मित्रं विस्रम्भेण विश्वासेन घ्नन्तीति तच्छीला मित्रविस्रम्भघातिनः ॥ ५६ ॥

किंच

सुवर्णभूमिहर्तॄणां
शौचाचारनिवर्तिनाम् ।
दयादाक्षिण्यहीनानां
पैशुन्यानृतचेतसाम् ॥ ५७ ॥

Sampath_eBooks

नरकास्तु समाख्याता-
स्त्वकर्मपथवर्तिनाम् ।

शौचमाचारश्च निजनिजशास्त्रोक्तौ। अन्यथा

'किंचिज्ज्ञैर्या स्मृता शुद्धिः साशुद्धिः शम्भुदर्शने ।
न शुद्धिर्ह्यशुचिस्तस्मान्निर्विकल्पो भवेन्नरः ॥'
(वि० भै० १२३)

इत्यादिश्रुतेर्निर्विषयत्वं स्यात्

'जिह्मजेनोपवीतेन............।' (३।२)

इत्यादि च पूर्वोक्तमवाच्यं स्यात्। अत्र च यथायोगं शरीरमनोवाग्विषयत्वं योज्यम्। एतदेवाकर्मपथवर्तित्वं यत् स्वशास्त्रविरुद्धाचरणम्। प्रकर्षाप्रकर्षयोगाच्चैषां पापानां तदुचितनरकसंबन्धः॥

ये तु एतद्विपरीतास्ते

शुभकर्मरता लोका
नरके न पतन्ति हि ॥ ५८ ॥

यच्च तेषां संबन्धि सुखं कर्म

तत्समासेन वक्ष्यामि
यथावदनुपूर्वशः ।

Sampath_eBooks

अनुपूर्वशः

'वाच्यर्था नियताः सर्वे वाङ्मूला वाङ्निबन्धनाः।'

इत्युक्तत्वात् वाचिकादिक्रमेण ॥

तच्च

सत्यं क्षान्तिरहिंसा च

एतानि वाङ्मनःकायकर्माणि सुखानि ॥

किंच

शौचं स्नानमकल्कता ॥ ५९ ॥

दयालौल्यं च यस्यासौ

नरकान्नाधिगच्छति।

शौचं प्राग्वत्। स्नानं भस्मादिनापि। अकल्कता शुभसंकल्पता। अलौल्यमिन्द्रियाचापलम् ॥

शान्तो दान्तः सुहृष्टात्मा

त्वनहंकारवान्समः ॥ ६० ॥

अद्रोही चानसूयश्च

परैश्वर्ये च निःस्पृहः।

नरकान्नाधिगच्छतीत्येव। शान्तो जितचित्तः। दान्तो जितेन्द्रियः। अतश्च विषयवैवश्याभा-

Sampath_eBooks

वात् सुहृष्टात्मा, निरहंकारश्च । समः शत्रुमित्रादि साम्येन पश्यन् । परैश्वर्ये निःस्पृहः संतुष्टः ॥

किंच

अमात्सर्यममानित्वं
शिवभक्तिरचापलम् ॥ ६१ ॥
जपध्यानरतिः स्थैर्यं
कार्पण्यस्य च वर्जनम् ।
व्रतानि नियमाश्चैव
स्वाध्यायश्च त्रिसंध्यता ॥ ६२ ॥
सर्वत्र श्रद्दधानत्व-
मार्जवं ह्रीर्मनस्विता ।
तेजः प्रशान्तिः संतोषो-
ऽप्रियवाक्यविवर्जनम् ॥ ६३ ॥
समीक्ष्यकारिता नित्यं
मनोहंकारनिग्रहः ।
अदम्भित्वममायित्व-
मकल्को ज्ञानशीलता ॥ ६४ ॥

Sampath_eBooks

पितृदेवार्चने भक्ति-
गोब्राह्मणशरण्यता ।
अग्नौ होमो गुरोर्दानं
ज्ञानिनां पर्युपासनम् ॥ ६५ ॥
एकान्ते च रतिर्ध्यान-
मात्मन्येव च तुष्टता ।
अव्यापारः परार्थेषु
औदासीन्यमनागसः ॥ ६६ ॥
अक्रोधित्वमनालस्य-
मेते धर्माः प्रकीर्तिताः ।

शिवभक्तिर्मुख्यो धर्मः । अचापलं कर्तव्यविषयारूढिः विशेषात्तु जपध्यानविश्रान्तौ । तेजः परानभिभवनीयत्वम् । प्रशान्तिः सौम्यदर्शनता । मनोहंकारयोः निग्रहो यत्रतत्रवर्तनपरिहारः । दम्भो मिथ्याचारता । माया परवञ्चनम् । अकल्कोऽपापचित्तः । परार्थेषु परवित्तेषु अव्यापारो मनसाप्यचिन्तनम् । औदासीन्यमिति व्यवहारविषयम् । अनागस इत्यनागस्त्वं गुर्वाज्ञादावप्र-

Sampath_eBooks

मादित्वम् । अनालस्यमिति उपादेयानुष्ठानो-
द्योगः । एते धर्माः शुभा आचाराः ॥

अतश्च

यस्त्वेतान्भजते भावा-
न्सोऽमृतत्वाय कल्पते ॥६७॥

शिवे भक्तिरेकैव मोक्षप्रदा किमङ्गैतद्धर्मा-
न्तरसहिता ॥ ६७ ॥

यस्मात्

नश्यन्ति पौरुषाः पाशा
येऽप्यनन्ताः प्रकीर्तिताः ।
शिवाचाररतानां तु
धार्मिकाणां हि देहिनाम् ॥६८॥
तस्मादेवं तु विज्ञाय
मनो धर्मे नियोजयेत् ।

पुरुषतत्त्वभुवनावसरे पौरुषा ये पाशा व-
क्ष्यन्ते, तेऽपि शिवभक्तिभाजां नश्यन्ति । धर्मे
इति प्रोक्तरूपे ॥

Sampath_eBooks

किंच

यस्य चित्तमसंभ्रान्तं
निर्विकल्पमकल्मषम् ॥ ६९ ॥
स याति परमांल्लोका-
न्नरकांश्च न पश्यति ।

अकल्मषत्वादपापत्वात् निर्विकल्पं कृत्वा तात्त्विकेऽर्थे समाश्वस्तम् । न पश्यतीति दर्शनमात्रमप्यस्य नास्तीति तदुपभोगे कैव संभावना ॥

यस्य बुद्धिरसंमूढा
सर्वभूतेष्वपातकी ॥ ७० ॥
अकल्कवान्सत्त्ववान्यो
नरकान्स न पश्यति ।

असंमूढा निवृत्ताज्ञाना । अकल्कवान् शुद्धाशयः, अत एव सत्त्ववृत्तिनिष्ठः ॥

जितानि येनेन्द्रियाणि
मनो यस्य वशे स्थितम् ॥७१॥

Sampath_eBooks

तज्जयेन जितं सर्वं
त्रैलोक्यं सचराचरम् ।

सर्वा भोगभूरनेन सुप्रापेत्यर्थः ॥

एतदेव श्लाघते

स्वकार्ये परकार्ये वा
यस्य बुद्धिः स्थिरा भवेत् ॥७२॥
एतदेव हि पाण्डित्यं
शेषाः पुस्तकवाचकाः ।

स्वकार्यमात्मज्ञाननिष्ठत्वं, परकार्यं परेषामात्मज्ञाने योजनम् ॥

उपसंहरति

इत्येष तान्त्रिको न्यायः
कथितस्तु समासतः ॥ ७३ ॥
अतान्त्रिकाणामन्येषां
परिसंख्या न विद्यते ।

तान्त्रिकः परमेशसंहिताप्रसिद्धः । अतान्त्रिकाः धर्मसूत्रकारादिप्रसिद्धाः ॥

Sampath_eBooks

असामान्यैराचारैः

शिवशास्त्ररता ये तु
गुरुभक्तिपरायणाः ॥ ७४ ॥
परतत्त्वविदो ये तु
न तेषां दुरितं भवेत् ।

दुष्टमितमागमनं जन्मेत्यर्थः ॥

एवं प्रसङ्गादुक्त्वा प्रकृतमाह

एतेषां नरकाणां तु
प्रधानानि निबोध मे ॥ ७५ ॥

पञ्चत्रिंशत्तु नरकाः

यस्मादेत एव

चतुर्भेदाः प्रकीर्तिताः ।

पञ्चत्रिंशत् चतुर्भिर्गुणिताः चत्वारिंशदधिकं शतं भवतीत्यर्थः ॥

तदाह

चत्वारिंशच्छतं ह्येत-
त्समासात्परिकीर्तितम् ॥ ७६ ॥

Sampath_eBooks

यस्मात्

तैर्विशुद्धैर्विशुध्यन्ति
पञ्चाशत्कोटयस्तु ताः ।

तैरिति चत्वारिंशदधिकशतसंख्यैः। ता इति पूर्वोपक्रान्ताः ॥

यदि वा

पञ्चत्रिंशद्यदा वैते
द्वात्रिंशद्वा विशोधिताः ॥७७॥
चत्वारिंशच्छतं शुद्धं
तदेतत्स्याद्वरानने ।

अवीचीकुम्भीपाकरौरववर्जं वक्ष्यमाणनामानो द्वात्रिंशत् ॥

यद्वा

त्रिभिः शुद्धैस्तु द्वात्रिंश-
च्छुद्धा एव भवन्ति हि ॥ ७८ ॥

निर्विशेषं न सामान्यमिति स्थित्या सामान्यशुद्ध्या विशेषशुद्धिः, विशेषाणां वा गर्भीकृतसामान्यानां शुद्ध्या सामान्यशुद्धिः। अत्र चायं

Sampath_eBooks

गुरूणामाशयः—यस्य दीक्ष्यस्य पापभूयस्त्वं नि-श्चितं, तस्य वितत्य नरकशुद्धिः कर्तव्या,अन्यस्य तु संक्षेपेणेति प्रघट्टकचतुष्टयेन शुद्धिरत्रोक्ता, किरणायां तु प्रघट्टकत्रयेण । यदुक्तं

'चत्वारिंशत्समधिकं यदेतेषां प्रकीर्तितम् ।
द्वात्रिंशत्तत्र राजानो राजराजेश्वरास्त्रयः ॥'

इति । श्रीमालिनीविजये कूष्माण्डरुद्रशुद्ध्यैव तच्छुद्धिरुक्तेति प्रक्रियाभेदः ॥ ७८ ॥

अथ

तेषां नामानि वक्ष्यामि
त्रयाणां वरवर्णिनि ।
अवीचिश्चैव विख्यातः
कुम्भीपाकश्च दारुणः ॥ ७९ ॥
महारौरवराजश्च

अथ

स्थानं तेषां निबोध मे ।
अधोमध्योर्ध्वभागेषु
संस्थितास्ते यथाक्रमम् ॥ ८० ॥

Sampath_eBooks

किंच

व्याप्तिं तेषां प्रवक्ष्यामि
यथावदनुपूर्वशः ।

द्वात्रिंशन्नरकास्त्रिभिर्यथान्तर्गर्भीकारेण व्याप्ताः, तथेत्यर्थः ॥

अत्र

नरकैकादशगत-
मवीचिं शोधयेत्प्रिये ॥ ८१ ॥
आत्मना द्वादशं देवि
कुम्भीपाकं विशोधयेत् ।
महारौरवसंज्ञं चा-
प्येवमेव न संशयः ॥ ८२ ॥

तानेतान्

पञ्चत्रिंशत्प्रवक्ष्यामि
समासेन वरानने ।
अवीचिः क्रिमिनिचयो
नदी वैतरणी तथा ॥ ८३ ॥

Sampath_eBooks

लोहश्च शल्मलिश्चैवा-
प्यसिपर्वत एव च ।
सोच्छ्वासश्च निरुच्छ्वासः
पूतिमांसः परस्तथा ॥ ८४ ॥

तप्तत्रपुः क्षारकूपो
जतुलेपस्तथैव च ।
अन्तर्भूता अवीचौ तु

अवीचिरेव क्रिमिनिचयपदेन विशेषितो न तु पूर्वनिर्दिष्टादसौ व्यतिरिक्तः संख्याधिक्यप्रसङ्गात् ॥

अथ

कुम्भीपाकस्य श्रूयताम् ॥ ८५ ॥

अस्थिभङ्गः क्रकचच्छेदः
कूपश्चापि कटङ्कटः ।
वसामिश्रो ह्ययस्तुण्ड-
स्त्रपुलेपः प्रकीर्तितः ॥ ८६ ॥

Sampath_eBooks

कुम्भीपाकश्च विज्ञेय-
स्तीक्ष्णासिश्च तथैव च ।
तप्तलोहश्च विज्ञेयः
क्षुरधारपथस्तथा ॥ ८७ ॥

अशनिश्च सुतप्तश्च
द्वादशैते प्रकीर्तिताः ।
एकादशान्तर्विज्ञेयाः
कुम्भीपाकस्य दारुणाः ॥ ८८ ॥

महारौरवराजे च
अत ऊर्ध्वं निबोध मे ।
कालसूत्रो महापद्मः
कुम्भः संजीवनेक्षुकौ ॥ ८९ ॥

पाशोऽम्बरेषकश्चैव
अयःपट्टस्तथैव च ।
दण्डयन्त्रस्त्वमेध्यश्च
घोररूपस्तथापरः ॥ ९० ॥

Sampath_eBooks

महारौरव एतेषा-
सुपरिष्टाद्व्यवस्थितः।

वसामिश्र इति यः पूर्वं मेदक उक्तः। अयस्तुण्डस्तु तीक्ष्णतुण्ड इति, तीक्ष्णासिरसिरिति, कुम्भस्तु कुम्भीर इति, अशनिरिति अशनी वृष्टिमुद्गराविति, पाशोऽप्युरग इति, दण्डयन्त्रो दण्ड इति पूर्वमुक्तः॥

यदा आदाववीच्यादित्रयमेव शोध्यते, तदा

अवीचौ कृमिनरका-
न्कुम्भीपाके सुदारुणान् ॥९१॥
महारौरवकेऽमेध्या-
नन्तर्भूतान्विचिन्तयेत्।

अथैतैस्त्रिभिर्व्यासानां

द्वात्रिंशन्नरकाणां च
मानं चैव निबोध मे॥ ९२॥

तत्र योजनानां

नवनवतिर्लक्षाणि
एकैकस्योच्छ्रयः स्मृतः।

Sampath_eBooks

एते च

लक्षमात्रान्तरा ज्ञेया
द्वात्रिंशच्चाप्यनुक्रमात् ॥ ९३ ॥

एवमेतन्मानं द्वात्रिंशत्कोटयो नरकभूः॥९३॥
अथ

एतेषामुपरिष्टात्तु
प्रभुत्वेन वरानने ।
योगैश्वर्यगुणोपेतः
कूष्माण्डाधिपतिः स्थितः ॥९४॥

एष च

'किति क्षितिः समुद्दिष्टा तस्यामूष्मानुलोमतः ।
सोऽण्डे यद्वदुरालोकः कूष्माण्डस्तद्वदुद्भटः ॥'

इति श्रीपरायां निरुक्तः । अस्य च कुकर्मजनानुशासकत्वात् क्रूररूपत्वं क्रूररूपनिर्वृत्तत्वं च श्रीपरायामुक्तमतः समस्तनरकशुद्धिं कृत्वैतच्छ्रावणा कार्या । एवमन्यत्र ॥ ९४ ॥

किंच

नवनवतिर्लक्षाणि
पुरं तस्य प्रकीर्तितम् ।

Sampath_eBooks

अथ

तस्योपरिष्टात्पातालान्
कथयामि समासतः ॥ ९५ ॥
आभासं वरतालं च
शार्करं च गभस्तिमत् ।
महातलं च सुतलं
रसातलमतः परम् ॥ ९६ ॥
सौवर्णमष्टमं ज्ञेयं
सर्वकामसमन्वितम् ।

विशेषणमेतत्सर्वसाधारणम् । आ समन्तात् सर्वरत्नादिभिर्भासनात्, वरभोगयोगात्, शर्करावत्स्पृहणीयगुणत्वात्, भास्वरत्वात्, महाभोगयुक्तत्वात्, शोभनतलत्वात्, रसास्वादयुक्तत्वात्, सुवर्णमयत्वाच्च एतान्येषां नामानि । यदुक्तं श्रीपरायां

'समन्तात्सर्वरत्नानां भासो यस्माद्विभान्त्यलम् ।
तद्धर्म्याणां च तत्स्त्रीणामाभासं तेन तत्स्मृतम् ॥'

इत्यादि । शर्कराख्यं तु तत्र नितरां भोगसंपत्त्यादितलमित्युक्तम् ॥

Sampath_eBooks

अथ

आभासाद्यावत्सौवर्णं
प्रमाणं कथयामि ते ॥ ९७ ॥
सहस्रनवकोत्सेध-
मेकैकं तु पुरोत्तमम् ।

उत्सेध औन्नत्यम् ॥

तथा

एकैकस्यान्तरं ज्ञेयं
सहस्रपरिसंख्यया ॥ ९८ ॥

एवं पातालानि अशीतिसहस्राणि ॥ ९८ ॥

किंच

छत्राकाराणि सर्वाणि
तेषां वै भुवनानि तु ।
सर्वकामैः समेतानि
गुणैः सर्वैर्युतानि तु ॥ ९९ ॥
हेमप्राकारशिखरै-
श्छत्रध्वजसमाकुलैः ।

Sampath_eBooks

किङ्किणीजालमुखरै-
स्तोरणाट्टालमण्डितैः ॥ १०० ॥
निर्गमैः सगवाक्षैश्च
दिव्यवस्त्रविभूषितैः ।
तन्त्रीमुरजवाद्यैश्च
गेयतूर्यरवाकुलैः ॥ १०१ ॥
नानाभुवनपङ्क्योघैः
सर्वरत्नसमुज्ज्वलैः ।
प्रासादैस्तुङ्गशिखरै-
श्चन्द्रातपसमप्रभैः ॥ १०२ ॥
रथ्यामार्गवरारामैः
सदापुष्पफलान्वितैः ।
कोकिलारावमधुरैः
शिखिषट्पदसेवितैः ॥ १०३ ॥
हंसकारण्डवाकीर्णै-
श्चक्रवाकोपशोभितैः ।
सारसारावसंघुष्ट-
पद्मिनीषण्डमण्डितैः ॥ १०४ ॥

Sampath_eBooks

तडागैः स्वच्छतोयाढ्यै-
दीर्घिकाभिर्युतानि तु ।
पुरुषैश्च महाकायै-
र्महाबलपराक्रमैः ॥ १०५ ॥
सर्वैश्वर्यस्वरूपाढ्यैः
सर्वलक्षणसंयुतैः ।
दिव्यवस्त्रैः सुताम्बूलै-
र्दिव्यगन्धानुलेपनैः ॥ १०६ ॥
दिव्याभरणसंयुक्तै-
र्मुकुटै रत्नमण्डितैः ।

युक्तानीत्येव । मुकुटैरित्युपलक्षितैरित्यर्थः ॥

किंच

शिवाराधनसक्ता ये
तत्प्रसादेन साधकाः ॥ १०७ ॥
ते विशन्ति महादेवि
पातालं सिद्धसेवितम् ।

तत्प्रसादेनेति काकाक्षिवत् योज्यम् ॥

Sampath_eBooks

विष्ट्वा तु

रसं रसायनं दिव्यं
सिद्धद्रव्यं लभन्ति ते ॥१०८॥

रसं हेमसाधनम्। रसायनं शरीरस्थैर्यहेतुः। सिद्धद्रव्यं पादुकादि तदुचितसिद्ध्यर्थं लब्ध्वा यथारुचि भुवनानि चरन्तीत्यर्थः॥ १०८॥

ये तु ततो न निर्यान्ति, ते

क्रीडन्ति चान्ये सततं
दिव्यानां योषितां गणैः।
कामिनः कामरूपैस्तु
मत्तमातङ्गगामिभिः॥ १०९॥
सर्वाभरणसंयुक्तैः
कामशास्त्रसुपेशलैः।
दिव्यवस्त्रपरीधानैः
स्तनभारसमानतैः॥ ११०॥
मध्यक्षामैः प्रसन्नास्यै-
स्तरलायतलोचनैः।
सकिङ्किणीनितम्बैश्च
हारकेयूरशोभितैः॥ १११॥

Sampath_eBooks

सुगन्धिगन्धलिप्ताङ्गैः
काञ्चीमेखलमण्डितैः ।
एवं ते कथिता देवि
पातालान्तरवासिनः ॥ ११२ ॥

किंच

त्रयोऽसुरास्तथा नागा
राक्षसाश्च विभागतः ।
एकैकत्र च पाताले
कथितास्ते वरानने ॥ ११३ ॥

कथिता इत्येतदन्यशास्त्रोक्तं श्रीभैरवः श्रीदेवीं स्मारयति । तथाच श्रीपरायाम्

'आभासे शङ्कुकर्णाख्यः कुटिलो विकलः पतिः ।
वरतालेऽपि प्रह्लादो वासुकिर्लोहिताननः ॥
नितले शिशुपालाख्यः कम्बलो यमदंष्ट्रकः ।
गभस्त्याख्ये सकर्कन्धुः कर्कटो विकटाननः ॥
महातले हिरण्याख्यः कालाङ्गश्च कराङ्गकः ।
रसातले बृहद्भोगो दुर्दर्शो भीमनिःस्वनः ॥
षडेतानि त्रिखण्डानि भोग्यान्येभिर्महात्मभिः ।
सुतले संस्थितोऽधस्ताद्बलिस्तक्षकपिङ्गलौ ॥

Sampath_eBooks

इत्युक्तम् ॥ ११३ ॥

किंच

पातालसप्तके ज्ञेया-
स्तथान्ये भुवनाधिपाः ।
बलो ह्यतिबलश्चैव
बलवान्बलविक्रमः ॥ ११४ ॥
सुबलो बलभद्रश्च
बलाध्यक्षश्च कीर्तिताः ।

यतः सप्तसु पातालेषु यथाक्रमं स्थिता एते रुद्रास्ततः

एतैः शुद्धैरिमे शुद्धाः
सप्तपातालवासिनः ॥ ११५ ॥

सप्तसु पातालेषु भूम्ना वसनं यैः स्वकर्मार्जितैः भोगविशेषैः त इमे प्रोक्ता भोगविशेषाः शुध्यन्तीत्यर्थः ॥ ११५ ॥

अतस्तु

यदूर्ध्वे चैव सौवर्णं
पातालं परिकीर्तितम् ।

Sampath_eBooks

तत्र वसत्यसौ देवो
हाटकः परमेश्वरः ॥ ११६ ॥
पुरकोटिसहस्रैस्तु
समन्तात्परिवारितः ।
सिद्धै रुद्रगणैर्दिव्यै-
र्भगिनीमातृभिर्वृतः ॥ ११७ ॥

सिद्धैः रुद्रैरिति सिद्धविशेषाक्षरुद्रमूर्तिभिः, भगिन्यो ब्राह्म्याद्यंशकोद्भूता देव्यः, मातरस्तु ब्राह्म्याद्याः ता हि प्रपञ्चव्याप्त्या परापरभावेन प्रायः सर्वत्र स्थिताः ॥ ११७ ॥

किंच

योगिनीयोगकन्याभी
रुद्रैश्चैव सकन्यकैः ।

योगिन्यो योगेन सिद्धाः, योगकन्यास्तु जातमात्रा एव संस्मारितयोगाः ॥

किंच

सिद्धद्रव्यसमैर्मन्त्रै-
श्चिन्तामणिरसायनैः ॥ ११८ ॥

Sampath_eBooks

सिद्धद्रव्यसमत्वं प्राप्तमात्राणामेवाभीष्टप्रदत्वम्। चिन्तामणिभिः रसायनैश्चेत्यर्थः ॥११८॥

तदित्थं

सिद्धविद्यासमृद्धं वै
हाटकेशस्य मन्दिरम् ।

एतच्च उक्तरुद्राद्युपलक्षणपरम् ॥

हाटकपदं निर्वक्ति

हठात्प्रवेशयेल्लोकां-
स्तद्भावगतमानसान् ॥ ११९ ॥
तेनासौ हाटकः प्रोक्तो
देवदेवो महेश्वरः ।

देवानां बलादीनां देवः, भगवतः श्रीकण्ठस्यैवेत्थं भोगप्रदत्वेनानया मूर्त्या स्थितत्वान्महेश्वरः ॥

एवं चान्तर्भूतपातालसप्तके तत्पुरशुद्धौ हाटकरुद्रोपस्थापनपूर्वं चतुर्थपटलोक्ताध्वसंधानादिसमस्तेतिकर्तव्यतां श्रावणान्तां कुर्यात्। एवं प्रतिभुवनेशमेतदेव स्मर्तव्यम्। तदेवं भूकटाहः कोटिः, कालाग्निरुद्रपुरं कोटिः, तज्ज्वाला

Sampath_eBooks

दश कोटयः, धूमः पञ्च कोटयः, नरका द्वात्रिंशत्कोटयः, कूष्माण्डपुरं नवनवतिलक्षाणि, पातालमशीतिसहस्राणि, इत्येवं सहस्रविंशत्यूनाः पञ्चाशत्कोटयः । एतावदन्तोऽध्वा कोटिपञ्चाशतैव, शिष्टानि तु

तस्योर्ध्वे तु सहस्राणि
योजनानां तु विंशतिः ॥१२०॥
भूकटाहः समुद्दिष्टः
समन्तात्तु वरानने ।

भूकटाहो मनुष्याधारभूः । एवमियदन्तं ब्रह्माण्डस्यार्धम् ॥

अतो भगवती पृथ्वी
नानाजनपदाकुला ॥ १२१ ॥
तस्या मध्ये महामेरुः
सौवर्णश्च वरानने ।
तस्याचलस्य विस्तार-
मूर्ध्वाधः कथयामि ते ॥१२२॥

जनपदो लोकानां निवासः ॥ १२२ ॥

Sampath_eBooks

तत्र

योजनानां सहस्राणि
चतुरशीतिरुच्छ्रितः ।
षोडशैव सहस्राणि
अधोभागे प्ररोपितः ॥ १२३ ॥

वैपुल्यमस्याह

तान्येव मूलविस्तारः

तानीति षोडशैव ॥

द्विगुणो मूर्धविस्तरः ।

द्वात्रिंशन्मूर्धविस्तारोऽस्येत्यर्थः ।

'भैरवीयं च तल्लिङ्गं धरणी चास्य पीठिका ।'

(तं० ८ आ० श्लो० ४५)

इति गुरवः । एष च श्रीपरायां कर्णिकाकार-मस्तक इत्युक्तः ॥

अथ

तस्योर्ध्वे तु सभा दिव्या
नाम्ना चैव मनोवती ॥ १२४ ॥
चतुर्दश सहस्राणि
योजनानां प्रमाणतः ।

Sampath_eBooks

सर्वरत्नसुशोभाढ्या
स्त्रीसहस्रसमन्विता॥१२५॥
सर्वभोगगणोपेता
ब्रह्मणस्तु महात्मनः।

ब्रह्मणः सत्यलोकस्थब्रह्मांशावतारस्यास्थानभूः, अतश्च सर्वत्र मध्यं ब्रह्मस्थानमुच्यते॥

साच
सिद्धविद्याधराकीर्णा
ऋषिभिः परिवारिता॥१२६॥
तस्या ईशानदिग्भागे
ज्योतिष्कं शिखरं स्मृतम्।

ज्योतिष्कं स्फाटिकम्॥

तच्च
सूर्यकोटिप्रतीकाशं
गणप्रथमसेवितम्॥१२७॥
सर्वर्तुकुसुमोपेतं
देवगन्धर्वसेवितम्।
स्त्रीसहस्रसमाकीर्णं
सर्वैश्वर्यसमन्वितम्॥१२८॥

Sampath_eBooks

गणप्रथमाः प्रधानगणाः ॥ १२८ ॥

तत्रास्ते भगवान्देव-
स्त्र्यम्बकः परमेश्वरः ।
लोकपालैर्वृतोऽसौ हि
ब्रह्मविष्ण्विन्द्रनायकः ॥१२९॥
ममांशं तं विजानीया;
सुरसिद्धनमस्कृतम् ।

कैलासवासिन उमापतेरियमुक्तिः ॥

सच तत्र

अधिकारं प्रकुरुते
परेच्छासंप्रचोदितः ॥ १३० ॥

एवं चाभिदधत् पर एवाहं श्रीसदाशिवेशानन्तश्रीकण्ठरूपतया विष्णुभुवनोर्ध्वस्थरुद्रत्वेन मेरुशिखरगतत्र्यम्बकत्वेन च प्रपञ्चव्याप्यावस्थितो नतु पृथक्त्वमेषामित्यादिशति । अधिकारं ब्रह्मविष्ण्विन्द्रनायकत्वमेव । एतच्च शृङ्गं प्रधानत्वादिहोक्तं, नत्वेतदेवास्ति श्रीचन्द्रगर्भादौ

Sampath_eBooks

'शृङ्गत्रयसमोपेता ब्रह्मविष्णुहरालयाः ।'

इति, श्रीकिरणायां तु

'त्रिभिः शृङ्गैः समायुक्तो रुक्मकाञ्चनरत्नजैः ।'

इति प्रतिपादितत्वात् ॥ १३० ॥

अस्य च मेरोः

सभाया ब्रह्मणोऽधस्ता-
त्सहस्राणि चतुर्दश ।
योजनानां परित्यज्य
चक्रवाटः समन्ततः ॥१३१॥

चक्राकारो वाटः पुरीणां समूहः ॥ १३१ ॥

एष एव च

स्वर्गाष्टकं समुद्दिष्टं

यतः

तत्र तिष्ठन्ति लोकपाः ।

इन्द्रादयः ॥

तत्र

पूर्वेणेन्द्रस्य विख्याता
पुरी नाम्नामरावती ॥ १३२ ॥

Sampath_eBooks

तेजोवती तथाग्नेय्यां
चित्रभानोः प्रकीर्तिता ।
दक्षिणे यमराजस्य
नाम्ना संयमनी पुरी ॥१३३॥
कृष्णाङ्गारा तु नैर्ऋत्यां
राक्षसेशस्य कीर्तिता ।
पश्चिमेन जलेशस्य
नाम्ना शुद्धवती स्मृता ॥१३४॥
वायव्यां तु पुरी वायो-
र्नाम्ना गन्धवहा प्रिये ।
उत्तरेणापि सोमस्य
पुरी नाम्ना महोदया ॥१३५॥
ऐशान्यामीशराजस्य
पुरी नाम्ना यशोवती ।

तथा

एतासामुत्तरे देवि
शृणु षड्विंशतिं पुरीः ॥१३६॥

Sampath_eBooks

दक्षिणेनामरावत्याः
कामवत्यप्सरःपुरी ।
सौवर्णी सिद्धसङ्घानां
तस्या वै दक्षिणेन तु ॥१३७॥
तस्या वै दक्षिणेनान्या
पद्मरागोपशोभिता ।
आदित्यानां पुरी ख्याता
नाम्ना चांशुमती शुभा ॥१३८॥
साध्यानां राजती दिव्या
ख्याता वै कुसुमावती ।

दक्षिणेनेत्येव । कामवती रेवत्याः पुरीत्यसत् कामवती सौवर्णीति हि नामनी ॥

वह्नेः पश्चिमदिग्भागे
विश्वेषां रेवती पुरी ॥१३९॥

रेवत्याख्या, विश्वे देवा यत्र स्थिताः ॥१३९॥

तस्यास्तु पश्चिमे देवि
दिव्या वै विश्वकर्मणः ।

दिव्येति नाम्ना ॥

Sampath_eBooks

पश्चिमे धर्मराजस्य
मातृनन्दा पुरी स्मृता ॥१४०॥
क्रीडन्ति मातरस्तत्र
मधुपानविघूर्णिताः ।
रुद्राणां पश्चिमे तस्या
रोहिता नाम काञ्चनी ॥१४१॥
तत्र शूलधरा रुद्रा
यमस्य परिचारकाः ।
तस्याः पश्चिमतो ज्ञेया
नाम्ना गुणवती पुरी ॥१४२॥
एकादशानां रुद्राणां
वज्रप्राकारतोरणा ।
निर्ऋतेः पूर्वभागे तु
पिङ्गला नाम वै पुरी ॥१४३॥
स्वकर्मसंज्ञा देवेशि
पिशाचास्तत्र संस्थिताः ।

स्वेन कर्मणा पिशिताशनेन निमित्तेन संज्ञा येषाम् ॥

Sampath_eBooks

नैर्ऋत्युत्तरसामीप्ये
पुरी कृष्णावती स्मृता ॥१४४॥
निस्त्रिंशा नाम तत्रैव
वसन्ति राक्षसाः सदा ।

नैर्ऋत्या दिश उत्तरं यत्सामीप्यं समीपं, तत्र ॥

तस्या अप्युत्तरे भागे
पुरी हैमी सुखावती ॥१४५॥
मित्रो वसति तत्रैव
बहुभृत्यजनावृतः ।

सुखावतीति नाम्ना ॥

तस्या अप्युत्तरे हैमी
गान्धर्वी नाम विश्रुता ॥१४६॥
वसन्ति तत्र गन्धर्वा
दिव्यकन्यासमावृताः ।
दशकोटिसहस्राणि
तेषां संख्या प्रकीर्तिता ॥१४७॥

Sampath_eBooks

भूतानां सिद्धसेना तु
वरुणस्य तु दक्षिणे ।
हेमसंज्ञा वसूनां तु
वरुणस्यापि चोत्तरे ॥१४८॥

वरुणस्येति तत्पुर्याः ॥ १४८ ॥

तस्यास्तूत्तरतो देवि
नाम्ना सिद्धवती पुरी ।
सर्वविद्याधराणां तु
सा पुरी परिकीर्तिता ॥१४९॥

वायोर्दक्षिणतो देवि
सिद्धा नाम पुरी स्मृता ।
वसन्ति किन्नरास्तत्र
पुरैर्हैमार्कसप्रभैः ॥१५०॥

वायोः पूर्वेण गान्धर्वी
हैमी चित्ररथस्य तु ।
गन्धर्वराजमुख्यस्य
दिव्यगन्धर्वनादिता ॥१५१॥

Sampath_eBooks

आस्ते भगवती साक्षा-
त्सप्तस्वरविभूषिता ।
ग्रामत्रयपरीधाना
जातिमेखलमण्डिता ॥१५२॥
मूर्च्छनातानचित्राङ्गी
नानातालकलोदया ।
लक्षणव्यञ्जनोपेता
मध्यमेनावगुण्ठिता ॥१५३॥
गन्धर्वैर्गीयमाना सा
तत्र देवी सरस्वती ।
नारदाद्यैश्च ऋषिभि-
र्नागकिन्नरसेविता ॥ १५४ ॥

ग्रामाः षड्जमध्यमगान्धाराः । षाड्जीनन्दय-न्त्याद्या जातयोऽष्टादश, ता एव मेखलाः। स्वरा मूर्च्छन्ति गुम्फनया समुच्छ्रायं नीयन्ते याभिस्ता मूर्च्छनाः उत्तरमन्द्राद्याः

'क्रमयुक्ताः स्वराः सप्त मूर्च्छनेत्यभिशब्दिताः ।' (२८।३४)

इति भरतनाट्यशास्त्रे लक्षिता एकविंशतिः,

Sampath_eBooks

तास्तायन्ते विस्तार्यन्ते यैस्ते तानाः एकोनपञ्चाशत् पञ्चत्रिंशच्च । यदुक्तं तत्रैव

'षट्पञ्चस्वरकास्ताना··············।' (२८।३४)

इत्युपक्रम्य

'तत्र मूर्च्छनाश्रयास्तानाश्चतुरशीतिरेकान्नपञ्चाशत्षट्स्वराः, पञ्चत्रिंशत्पञ्चस्वराः'

इति। तालाश्चञ्चत्पुटाद्या यत्यात्मकाः। कलास्तु तालाक्षररूपा गुरुलघुमात्राः । लक्षणानि

'भूषणाक्षरसंघातौ शोभोदाहरणे तथा ।'

इत्यादीनि षट्त्रिंशत् । व्यञ्जनेति व्यज्यन्ते येषु गीतकविशेषेषु तैरुपेता । मध्यमेनेति मध्यमाख्येन स्वरेण श्रव्यतातिशययोगादवगुण्ठिता । नायिकापक्षे रूपकाणां श्लेषच्छाया स्पष्टा ॥ १५४

तस्याः पूर्वेण चित्रा वै
तुम्बुरोर्नारदस्य च ।
सोमस्य पश्चात्प्रमदा
गुह्यकानां पुरी स्मृता ॥१५५॥

Sampath_eBooks

पूर्वेणैव तु सोमस्य
नाम्ना चित्रवती पुरी ।
सर्वधातुमयी चित्रा
कुबेरस्य महात्मनः ॥१५६॥
सहि तत्र
षड्विंशतिसहस्रैस्तु
कोटीनां परिवारितः ।
यक्षाणामुत्तमः श्रीमा-
नास्ते भोगैरनुत्तमैः ॥१५७॥
युक्तः ॥ १५७ ॥
तस्याः पूर्वे शुभा नाम्ना
जाम्बूनदमयी पुरी ।
तत्र वै कर्मदेवास्तु
ते च
देवत्वं कर्मणा गताः ॥१५८॥
वाजपेयादिना ॥ १५८ ॥
पश्चिमेनेशराजस्य
विष्णोर्वै श्रीमती पुरी ।

Sampath_eBooks

तत्रास्ते श्रीपतिः श्रीमा-
नतसीपुष्पसन्निभः ॥१५९॥
शङ्खचक्रगदापाणिः
पीतवासा जनार्दनः ।
ईशस्य दक्षिणे भागे
नाम्ना पद्मवती पुरी ॥१६०॥
महापद्मोपविष्टस्य
पद्ममालाधरस्य तु ।
पद्मपत्रायताक्षस्य
ब्रह्मणः पद्मजन्मनः ॥१६१॥

सत्यलोकनिवासिब्रह्मांशावतारस्य ॥ १६१ ॥

तस्या दक्षिणतो देवि
नाम्ना कामसुखावती ।
अश्विनौ तत्र देवेशि

देववैद्यौ ॥

तथा धन्वन्तरिः स्थितः ॥१६२॥

गोवैद्यः ॥ १६२ ॥

Sampath_eBooks

उत्तरे त्वमरावत्या
महामेघेति विश्रुता ।
विनायकानां सा दिव्या
वसतिस्तत्र कल्पिता ॥१६३॥

ते हि पूर्वं

दशकोटिसहस्राणि
वीर्यवन्तः शुभास्तथा ।
विनायका महादीप्ता
अग्निज्वलिततेजसः ॥१६४॥
असुराणां वधार्थाय
अङ्गुष्ठान्निर्मिता मया ।

अङ्गुष्ठात् कालाग्निस्थानान्निर्मितत्वाद्दीप्तत्वमेषाम् ॥

उपसंहरति

एवंविधैरधश्चोर्ध्वं
मेरुः पुरवरैर्वृतः ॥१६५॥

Sampath_eBooks

ऊर्ध्वं ब्रह्मसभाया ज्योतिष्कगतत्र्यम्बकपुरेण ॥ १६५ ॥

एताश्च

पुर्यश्च याः समाख्याता
मेरोश्चैव समन्ततः ।
पुरकोटिसहस्रैस्तु
सर्वास्ताः संभृताः प्रिये ॥१६६॥
सर्वैश्वर्यसुसंपूर्णाः
सर्वरत्नसमुज्ज्वलाः ।
दिव्यस्त्रीभिः समाकीर्णा
दिव्यपुंभिः समाकुलाः ॥१६७॥

तत्र

आनन्दः सततं देवि
देवानां च पुरे पुरे ।
विमाननगरारामै-
श्चतुरोद्यानमण्डपैः ॥ १६८ ॥
छत्रध्वजपताकाभि-
र्गजवाजिसमाकुलैः ।

Sampath_eBooks

दुन्दुभीनन्दिशब्दैश्च
शङ्खकाहलनिःस्वनैः ॥१६९॥
गीतनृत्तैस्तथाकीर्णं
देवानां मन्दिरं सदा ।

आकीर्णमाकुलम् ॥

अतश्च

इष्टापूर्तरता देवि
ये नरा पुण्यभारते ॥१७०॥
त्र्यम्बकं सकृदर्चन्ति
मेरुं गच्छन्ति ते नराः ।

पुण्यजनाश्रये वक्ष्यमाणे भारते वर्षे इष्टापूर्ते रता ये च त्र्यम्बकं महेश्वरं सकृदेकवारं हेलामात्रेण अर्चयन्ति ते मेरुं प्राप्नुवन्ति, गृहीतदीक्षास्तु सततं तदर्चापरा मुच्यन्त एव ॥

येऽपि

गङ्गातोयसुसंसिक्ताः

तेऽपि तत्र

क्रीडन्ति सुरसत्तमाः ॥१७१॥

Sampath_eBooks

प्राप्तप्रधानसुरभावाः ॥ १७१ ॥

एवं श्रुतगङ्गाप्रभावा तज्जिज्ञासार्थं श्रीदेव्युवाच

कथं गङ्गा समुत्पन्ना
सुरसिद्धनमस्कृता ।
कथयस्व प्रसादेन
समासात्सुरसत्तम ॥१७२॥

श्रीभैरव उवाच

गङ्गायाश्च समुत्पत्तिं
कथयिष्यामि सुव्रते ।
तां वक्तुमुपक्रमते
जगन्माता महादेवि
मम पत्नी पुरा हि सा ॥१७३॥

मम परया व्याप्त्या विश्वकारणस्य परयैव व्याप्त्या स्थिता पत्नी क्षयाख्या शक्तिरत एव पुरा जगन्माता आदिसर्गे विश्वप्रसरहेतुः ॥

स्वातन्त्र्याद्गृहीतरुद्रलोकाधिष्ठातृरुद्रमूर्तेस्तु असौ

Sampath_eBooks

मम नेत्रोदकं चैव

आनन्दाश्रु इत्यर्थः ॥

यस्मादाकृतिमत्या प्रणयकेलिवशेन कदाचित्

करजैश्छादिते मम ।

पुनरुद्घाटिते नेत्रे

जगन्मातः पुरा त्वया ॥१७४॥

मन्नेत्रेभ्योऽस्रवत्तोयं

त्वदीयाङ्गुलिभिः प्रिये ।

एवं चाभिदधदुमापतिरूर्ध्वस्थरुद्रलोकवर्तिरुद्रभट्टारकाभेद आत्मनः, तत्रस्थदेव्यभेदश्चोमाभट्टारिकाया इत्यादिशति ॥

यच्च तत्तोयमङ्गुलिभिः स्रुतं, तदेव

दशधा निःसृता गङ्गा

तासां मध्यात्

कपालावरणे मम ॥१७५॥

Sampath_eBooks

सप्तैव संस्थितास्तत्र

कान् प्रजापतीन् पालयतीति कपालो रुद्र-स्तदावरणे तल्लोके ब्रह्माण्डोर्ध्वकपालोपलक्षितावरणे रुद्रलोके इत्यर्थः । यद्वक्ष्यति

'वरेण्या वरदा चैव वरिष्ठा वरवर्णिनी ।
वसिष्ठा च वराहा च वरारोहा च सप्तमी ॥
गङ्गा ह्येताः समाख्याता रुद्रलोकवहाः सदा ।'(१०।५४५)

इति ॥

तिसृणां मध्यात्तु

एका विष्णुपुरे स्थिता ।

द्वितीया ब्रह्मलोकोर्ध्वे

ब्रह्मलोकस्य सत्यलोकस्य यदूर्ध्वं

'कोटियोजनमानेन सत्यलोकोपरि प्रिये ।
ब्रह्मासनमिति ख्यातं जपासिन्दूरसप्रभम् ।'

इति यत् ब्रह्मणो निवासस्थानं, तत्र ॥

तृतीया सत्यलोकगा ॥१७६॥

तृतीयैव प्राकाम्यवशात्

स्वर्गे चैव

Sampath_eBooks

किंच

पुनः सा वै
संस्थिता सोममण्डले ।

सोमलोके ॥

एषैव तु

सोमाच्चैव विनिःसृत्य
पुराकाशे व्यवस्थिता ॥१७७॥

सोमात् सोमलोकात् ॥ १७७ ॥

ततोऽहं संस्तुतो देवि
ब्रह्मविष्णुपुरःसरैः ।

यथा

गङ्गा नदीं महापुण्यां
मर्त्यानां हितकाम्यया ॥१७८॥

अवतार्य महादेव
मर्त्यलोकं विसर्जय ।

आकाशादित्यर्थात् ॥

ततो मया सुरेशानि
प्रोक्ता सा त्वपराजिता ॥१७९॥

Sampath_eBooks

लोकानां तु हितार्थाय

आगच्छ सुरसुन्दरि ।

अथासौ

आगत्य मम मूर्धानं

ममेति ज्योतिष्कशिखरगतस्य ॥

मेरुमूर्ध्नि पुनर्गता ॥१८०॥

तस्मान्निर्गत्य देवेशि

चतुर्दिक्षूदधिं गता ।

साच

पूर्वे सीता समुद्दिष्टा

सुवहा दक्षिणेन तु ॥१८१॥

सुनन्दा पश्चिमे भागे

भद्रसोमा तथोत्तरे ।

बहुपर्वतादिव्यवहितचतुर्दिग्गतोदधिप्राप्ति-गङ्गायाः प्राकाम्यादिति मन्तव्यम् ॥

प्रसङ्गाद्गङ्गामाहात्म्यमुक्त्वा प्रकृतमाह

Sampath_eBooks

मन्दरस्तु महादेवि
गन्धमादनसंज्ञकः ॥१८२॥
विपुलश्च सुपार्श्वश्च
पूर्वाद्या उत्तरान्तकाः ।
विष्कम्भाश्च समाख्याताः

अवष्टम्भका इत्यर्थः । यदुक्तं श्रीतन्त्रालोके

'एतैर्भुवमवष्टभ्य मेरुस्तिष्ठति निश्चलः ।' (८।६०)

इति ॥

एषां पर्वतानां
वर्णांश्चैव निबोध मे ॥१८३॥
सितं चैव हरिद्राभं
नीलं दाडिमसप्रभम् ।

स्फटिकहेममहानीलपद्मरागसमा एते इत्यर्थः ॥

एषां च पृथङ्मानस्यानुक्तत्वात् भाविनवसहस्रेलावृताङ्कतैव मन्तव्या । तथाच श्रीकिरणायाम्

'..................इलावृतम् ।
मेर्वन्तं चतुरस्रं तु सहस्रनवसंयुतम् ॥'

Sampath_eBooks

इति तस्योक्तत्वात् अर्थात्तदेकदेशता पादपर्वंता-
नाम् ॥

किंच

प्राग्विष्कम्भसमीपे तु
नाम्ना चित्ररथं वनम् ॥१८४॥
तत्रारुणोदकं नाम
तडागं पद्ममण्डितम् ।
गन्धमादनसामीप्ये
नन्दनं तु महावनम् ॥१८५॥
तस्य मध्येऽम्बुजच्छन्नं
मानसं तु सरोवरम् ।
विपुलस्य समीपे तु
वैभ्राजं तु महावनम् ॥१८६॥
सितोदं तस्य मध्ये तु
तडागं विमलोदकम् ।
वनं पितृवनं नाम
स्वपार्श्वस्य समीपतः ॥१८७॥

Sampath_eBooks

तस्यान्तस्तु महाभद्रं
तडागं च मनोरमम् ।
अत्रैव
कल्पद्रुमांश्च चतुरः
कथयामि निबोध तान् ॥१८८॥
मन्दरेऽथ कदम्बं स्या-
न्मस्तके तु व्यवस्थितम् ।
सहस्रयोजनायामं
शाखापञ्चशतोच्छ्रितम् ॥१८९॥
पुष्पैः कुम्भप्रमाणैश्च
भ्राजते तत्सुपुष्पितम् ।

कदम्बं वृक्षः । तच्च शाखाभिः सह सार्धसहस्रयोजनोच्छ्रायम् ॥

तत्प्रमाणा स्मृता जम्बू-
र्गन्धमादनमूर्धनि ॥१९०॥
तस्याः फलसमूहोत्थो
रसो ज्ञेयोऽमृतोपमः ।

Sampath_eBooks

तेन जम्बूनदी जाता
प्रिये वेगवती भृशम् ॥१९१॥

तेनेति रसेन ॥ १९१ ॥

सच

मेरुं प्रदक्षिणीकृत्य
जम्बूमूलं विशेत्स्वकम् ।
तत्संपर्कात्समुत्पन्नं
कनकं देवभूषणम् ॥ १९२ ॥
तेन जाम्बूनदं लोके
ज्ञायते भूषणोत्तमम् ।
तत्र वृक्षलतागुल्माः
पक्षिणः श्वापदादयः ॥१९३॥
जाम्बूनदमयाः सर्वे
ये चान्ये तत्रवासिनः ।

किंच

विपुलेऽपि तथाश्वत्थः
केतुमाल इति श्रुतः ॥१९४॥

Sampath_eBooks

तथेति तत्प्रमाणकः ॥ १९४ ॥

केतुमालसंज्ञां व्याचष्टे

तस्येन्द्रेणासुराञ्जित्वा
रत्नमाला प्रलम्बिता ।
तेनासौ केतुमालेति
ख्यातः सिद्धनिषेवितः ॥१९५॥

किंच

न्यग्रोधश्च सुपार्श्वे तु
तत्तुल्यः परिकीर्तितः ।

प्रमाणमहत्त्वाभ्याम् ॥

तदित्थम्

अनेकगुणसंपन्नो
मेरुः ख्यातः समासतः ॥१९६॥

अथ यथायं समासत उक्तः

तत्पार्श्वस्थान्प्रिये देशा-
न्कथयामि समासतः ।

तत्रादौ

मेरुमध्याच्चतुर्दिक्षु
लक्षार्धं तु समासतः ॥ १९७ ॥

Sampath_eBooks

लवणोदधिपर्यन्तं
जम्बुद्वीपं समन्ततः ।

मेरुमूलमध्यात् पञ्चाशत्सहस्राणि, तत्पार्श्व-द्वयकलनया लक्षं भवति ॥

पर्वतान्तरितास्तत्र
नव भागा भवन्ति हि॥१९८॥

तत्रेति जम्बुद्वीपे । भागाः खण्डाः ॥

तथाहि

दक्षिणे चैव दिग्भागे
त्रयो ज्ञेया महीधराः ।
निषधो हेमकूटश्च
हिमवानिति ते त्रयः ॥१९९॥

'निषिद्धो यत्र वै तार्क्ष्यः शेषाहिं हन्तुमुद्यतः ।'

इति

'हेमकूटस्तथा सोऽद्रिर्यत्र दत्तः प्रजापतेः ।
सुवर्णस्य महाकूटो यागार्थं धनदेन तु ॥'

इति

'...............हिमवान्हिमकूटवान् ।
रत्नाढ्योऽपि हिमप्रायस्तेनासौ हिमवान्गिरिः ॥'

इति श्रीपरायां निरूपितम् ॥ १९९ ॥

Sampath_eBooks

किंच

उत्तरे चापि मेरोस्तु
नीलः श्वेतोऽथ शृङ्गवान् ।

'शनिस्तत्र सुनीलाभो जातो नीलस्त्वतो गिरिः ।
नीलवच्च गिरिः श्वेतो यत्र श्वेतो महामुनिः ॥
मृत्युना ग्रस्यमानोऽपि रक्षितश्चन्द्रमौलिना ।'

इति

'श्वेतवच्च त्रिशृङ्गोऽद्रिर्वज्रपातोपमर्दनः ।
त्र्यश्रितस्तेषु शृङ्गेषु किल देवास्त्रयः स्थिताः ॥'

इत्यपि तत्रैवोक्तम् ॥

एषां मानमाह

प्राक्पश्चिमायता ह्येते
षडेव तु महीधराः ॥ २०० ॥

पूर्वाब्धेः पश्चिमाब्धिं प्राप्ताः ॥ २०० ॥

तत्रापि

नीलश्च निषधश्चैव
लक्षायामौ प्रकीर्तितौ ।

मध्यासन्नत्वात् ॥

द्वीपवर्तुलतानुपाततस्तु

Sampath_eBooks

श्वेतश्च हेमकूटश्च
सहस्रनवतिः स्मृतौ ॥ २०१ ॥
हिमवान् शृङ्गवांश्चैव
सहस्राशीतिरेव तु ।

तदेते
लवणोदधिपर्यन्ताः
पार्श्वमानात्तु
सहस्रद्वयविस्तृताः ॥ २०२ ॥

किंच
कैलासयुक्तो हिमवां-
स्त्रिशृङ्गश्च सजारुधिः ।

हिमवतो मध्ये कैलासः शृङ्गरूपः । यदुक्तं देवीयामले

'तस्य मध्ये महाशृङ्गं शतयोजनविस्तृतम् ।'

इत्युपक्रम्य

'तत्रासावमरैः सार्धं शूली वसति सर्वदा ।'

इति । शृङ्गवतस्तु जारुधिः संलग्नः ॥

एषां प्रातिलोम्यतो वर्णं निरूपयति

Sampath_eBooks

शृङ्गवांश्चन्द्रकनिभः
सितः श्वेतो विराजते ॥२०३॥
नीलरत्नमयो नीलो
निषधः पद्मरागभः ।
सौवर्णो हेमकूटश्च
हिमाभो हिमवानिति ॥ २०४॥

मेरोः पूर्वपश्चिमयोः पर्वतावाह

पूर्वेण माल्यवान्मेरोः
पर्वतस्तु विराजते ।
चतुस्त्रिंशत्सहस्राणि
योजनानां सुरेश्वरि ॥ २०५ ॥
याम्योत्तरायतो भाति
सहस्रं तस्य विस्तृतिः ।
तथैवापरदिग्भागे
तत्तुल्यो गन्धमादनः ॥२०६॥

आयामविस्ताराभ्याम् । अयं च दक्षिणस्था-द्विष्कम्भकगन्धमादनादन्यः । एतौ च श्री-परायां

Sampath_eBooks

'दृष्ट्वा माल्यानि दिव्यानि ब्रह्मसेवार्थमागतैः ।
संभृतानि यतः सिद्धैर्माल्यवांस्तेन लप्यते ॥'

इति, तथाच

'मदमत्ता पुरा दृष्टा माल्या विद्याधरी किल ।
ऋषिणा नारदेनास्मिन्नाघ्राता मोदभाविता ॥
गन्धो मे मादनो विप्रेत्युक्तस्तद्गन्धमादनः ।'

इति निरुक्तौ ॥ २०६ ॥

एषां सर्वेषामुच्छ्रायमानमाह

नीलश्च निषधश्चैव
माल्यवान्गन्धमादनः ।
चत्वारिंशत्सहस्राणि
योजनानां समुच्छ्रिताः॥२०७॥

नीलादयो मेरोः प्रतिप्राकारस्थानीयत्वेन स्थिताः एवंप्रमाणकाः । दक्षिणोत्तरगतानां तु श्वेतशृङ्गवद्धेमकूटहिमवतां दशयोजनसहस्रोच्छ्रितत्वम् । यदुक्तं श्रीमृगेन्द्रोत्तरे

'सहस्रद्वयविष्कम्भा दशोत्सेधा नवान्तराः ।' (१३ पट०)

इति । एवं दक्षिणोत्तरस्थैस्त्रिभिस्त्रिभिः पूर्वपश्चात्स्थाने च एकैकेनेत्यष्टाभिः पर्वतैर्विभक्तं नवधा जम्बुद्वीपं जातम् ॥ २०७ ॥

Sampath_eBooks

किंच

चतुर्दिक्षु गतौ मेरो-
द्वौं द्वौ सीमान्तपर्वतौ ।

पूर्वादिदिगभिमुखौ समुद्रान्तं प्राप्तौ ॥

तत्र

जठरो हेमकूटस्तु
पूर्वभागे व्यवस्थितौ ॥२०८॥
कैलासो हिमवांश्चैव
दक्षभागे व्यवस्थितौ ।
निषधः पारियात्रश्च
अपरेण महीधरौ ॥ २०९ ॥
जारुधिः शृङ्गवांश्चैव
उत्तरेण व्यवस्थितौ ।

पूर्वोक्तहेमकूटादिसमनामानः अन्य एवामी हेमकूटाद्याः । एते चाष्टावलङ्घ्यत्वात् नवधा विभक्तस्य जम्बुद्वीपस्य नवभागान्तरहेतव इति ॥

पूर्वोक्तपर्वतैर्नवविभक्तेऽत्र नामभेदेन देश-विभागमाह

Sampath_eBooks

मेरोः समन्ततो रम्य-
मिलावृतमुदाहृतम् ॥ २१० ॥
अधस्ताच्चक्रवाटस्य
नवसाहस्रविस्तृतम् ।
योजनानां चतुर्दिक्षु
चतुरश्रं समन्ततः ॥ २११ ॥

तेन मध्यवर्तिनः षोडशसाहस्रिकस्य मेरोः पार्श्वद्वयं नव नव सहस्राणीत्याकलय्य दैर्घ्य-दिशा चतुस्त्रिंशत्सहस्रमेतद्भवति । अत एव पूर्व-पश्चात्स्थयोर्माल्यवद्गन्धमादनयोश्चतुस्त्रिंशत्सहस्राणि दैर्घ्यमिति युक्तमुक्तम् । अस्य च निर्वचनम्

'इला नामाप्सरा दिव्या रूपयौवनशालिनी ।
दृष्टा साम्प्रतरूपेण विचरन्ती मनोहरा ॥
भुजाभ्यामावृता रागात्तेनेलावृतमुच्यते ।'

इति श्रीपरायामुक्तम् ॥ २११ ॥

अत्र च चक्रवाटावृतत्वात्

नातपो भानुजस्तत्र
नच सोमस्य रश्मयः ।

Sampath_eBooks

प्रभवन्ति हि लोकानां

किंत्वेतत्

मेरोर्भासा प्रभासितम् ॥२१२॥

अत एव

प्रत्यग्राम्बुजपत्राभा

जनाश्चातीव कोमलाः ।

जम्बूरसफलाहारा

जरामृत्युविवर्जिताः ॥ २१३ ॥

त्रयोदशाब्दसाहस्रं

तेषामायुः प्रकीर्तितम् ।

अतश्चाकालमृत्युविवर्जिता इत्युक्तं भवति॥

किंच

देवगन्धर्वसिद्धाश्च

ऋषयोऽथ विनायकाः ॥२१४॥

गणमातृभगिन्यश्च

वेताला राक्षसादयः ।

एवमाद्यैरसंख्यातै-

र्वृतं चैतदिलावृतम् ॥ २१५ ॥

Sampath_eBooks

अथ

गन्धमादनवारुण्यां
समुद्रस्य च पूर्वतः ।
केतुमालमिति ख्यातं
वर्षं सर्वगुणोत्तमम् ॥ २१६ ॥

मेरुपश्चात्स्थगन्धमादनस्य या वारुणी, सा पश्चिमाब्धेः पूर्वैव भवति । उक्तं च श्रीपरायां

'देवासुराणामारम्भे दारुणे समुपस्थिते ।
अकस्मात्तत्र केतूनां या माला सहसोत्थिता ॥
तां दृष्ट्वा विबुधा भीताः केतुमालमतो मतम् ।'

इति । वर्षं जनपदः ॥ २१६ ॥

नीलोत्पलदलश्यामा
जनास्तत्र सुशोभनाः ।
पनसस्य रसं पीत्वा
जीवन्त्ययुतमेव च ॥ २१७ ॥

दश सहस्राणि अयुतम् ॥

किंच

जयन्तो वर्धमानश्च
अशोको हरिपर्वतः ।

Sampath_eBooks

विशालः कम्बलः कृष्ण-
स्तत्र सप्त कुलाद्रयः ॥ २१८ ॥

मेरोरग्रे तु
माल्यवत्पूर्वभागेन
समुद्रस्यापरेण तु ।
वर्षं भद्राश्वसंज्ञं च
तत्रापि त्वयुतायुषः ॥ २१९ ॥
जनाश्चन्द्रप्रतीकाशाः
कालाम्रफलभोजनाः ।

उक्तं च श्रीपरायाम्

'उच्चैःश्रवास्तु भद्राश्वः क्षीरोदमथनोद्धतः ।
तस्मिंश्चरति येनाश्वो भद्राश्वं तेन तत्स्मृतम् ॥'

इति ॥

किंच
कौरञ्जः श्वेतपर्णश्च
नीलो मालाग्रकस्तथा ॥२२०॥
पद्मश्चैव समाख्याता-
स्तत्र पञ्च कुलाद्रयः ।

Sampath_eBooks

एते च केतुमालभद्राश्वे
द्वात्रिंशत्तु सहस्राणि
पूर्वपश्चायते स्मृते ॥ २२१ ॥
चतुस्त्रिंशत्सहस्राणि
दक्षिणोदक्समायते ।

एवं च केतुमालभद्राश्वे प्राक् पश्चात् द्वात्रिंशत् द्वात्रिंशत् सहस्राणि, गन्धमादनो माल्यवांश्चैकमेकं सहस्रम्, इलावृतमुभयपार्श्वगतमष्टादश, षोडश मेरुरित्येवं लक्षयोजनं जम्बुद्वीपं पूर्वापरतः । जठरादिसीमान्तपर्वतमानं जयन्तादिकुलपर्वतमानं च तत्रैव एकदेशीभूतत्वान्न पृथग्गणनीयम् ॥

एवं पूर्वपश्चिमयोर्वर्षस्थितिमुक्त्वा उत्तरेऽपि तामाह

वर्षे द्वे तु समाख्याते

समाख्यात इत्युपसंहारोपक्रमयोः काकाक्षिवद्योजनीयम् । पूर्वपश्चाद्गते केतुमालभद्राश्वे समाख्याते ॥

मेरोरुत्तरे तु ये वक्ष्यमाणविभागे कुरुहिरणमये वर्षे, तयोर्मध्यात्

Sampath_eBooks

कुरुवर्षनिवासिनः ॥ २२२ ॥

कुरवो नाम लोकास्ते

यस्मात्

कुरुवृक्षफलाशिनः ।

अतश्च

त्रयोदशसहस्राणि

जीवन्ति स्थिरयौवनाः ॥२२३॥

युग्मं युग्मं प्रसूयन्ते

वियोगभयवर्जिताः ।

तुल्यकालं जायन्ते, तथैव म्रियन्ते इत्यर्थात्। अतश्च पतिमनुयातानां स्त्रीणामनुजन्म संभाव्यते ॥

किंचात्र

श्यामापुष्पनिभाः स्निग्धाः

सुरूपाः पुरुषाः स्त्रियः॥२२४॥

स्त्रियश्चेत्यर्थ ॥ २२४ ॥

तथा

सर्वरत्नमयी भूमि-

र्हिमवालुकया चिता ।

Sampath_eBooks

एतच्च कुरुवर्षं पार्श्वमानात्
नवयोजनसाहस्रं
धन्वाकारं प्रकीर्तितम् ॥ २२५॥

धन्वाकारमित्यत्र सकारलोपश्छान्दसः । दैर्घ्यादेतच्छृङ्गवत्प्रमाणम् । अनुपातेन वलयाकृत्यवस्थितोत्तराब्धिसमीपगतत्वात् धनुराकारतैवास्य भवति ॥

सूर्यकान्तेन्दुकान्तौ च
द्वौ तत्र कुलपर्वतौ ।
कल्पवृक्षः कुरुर्नाम
तत्रैव कुसुमोज्ज्वलः ॥ २२६ ॥
तस्य नाम्ना तु तज्ज्ञेयं
कुरुवर्षं सुशोभनम् ।

श्रीमत्परायां

'रम्यवत् कुरुवर्षाख्यमुपमन्युर्हरेण सः ।
कुर्वेवं तु पिब क्षीरं यत्रोक्तस्तेन तत्कुरु ॥'

इति निरुक्तम् ॥ २२६ ॥

अथ

तस्य चोत्तरदिग्भागे
प्रविश्य लवणोदधिम् ॥ २२७॥

Sampath_eBooks

पञ्चयोजनसाहस्रं
चन्द्रद्वीपं प्रकीर्तितम् ।
तथा वायव्यदिग्भागे
प्रविश्य लवणोदधिम् ॥ २२८॥
योजनानां सहस्राणि
चत्वार्येव वरानने ।
दशयोजनसाहस्रं
द्वीपं भद्रं प्रकीर्तितम् ॥२२९॥
भद्राकारमिति ज्ञेयं
सर्वकामफलप्रदम् ।

चत्वार्येवेत्येवकारात् पूर्वत्राप्यब्धिप्रवेशे एतत्संबध्यत एव ॥ २२९ ॥

किंच

अयुतायुषो जनास्तत्र
दिव्यामृतफलाशिनः ॥२३०॥

इत्थमेव

चन्द्राख्येऽप्ययुतं चायु-
र्जीवन्ति फलभोजिनः ।

Sampath_eBooks

एवं शृङ्गवदुत्तराभ्यन्तराले कुरुवर्षमुक्त्वा, हिरणमयं वर्षमाह

श्वेतशृङ्गवतोश्चैव
मध्ये ज्ञेयं हिरण्मयम् ॥२३१॥

हेममयत्वादिहैवमुक्तं, परायां तु

'यत्र गन्धर्वमुख्येन रमणा रमिता बलात् ।
रमणं तत्परं वर्षम्·················॥'

इति संज्ञान्तरेणोक्तम् । गन्धर्वमुख्येन चित्ररथेन, रमणाख्या अप्सराः ॥ २३१ ॥

लकुचस्य फलं प्राश्य
जनास्तत्रेन्दुसन्निभाः ।
जीवन्त्यब्दसहस्राणि
मानेनार्धत्रयोदश ॥२३२॥

अथ

नीलस्योत्तरदिग्भागे
तथा श्वेतस्य दक्षिणे ।
रम्यकं नाम वर्षं तु

Sampath_eBooks

एतदपि परायाम्

'उर्वशी याप्सरा भद्रा दृष्ट्वा चन्द्रमसा किल ।
प्रोक्ता रम्येति तद्वाक्याचेनेदं रम्यनामकम् ॥'

इति निरुक्तम् ॥

तत्र च

न्यग्रोधफलभोजनाः ॥२३३॥

नीलोत्पलदलश्यामा
जरारोगविवर्जिताः ।

अतश्च

द्वादशाब्दसहस्राणि
तेषामायुः प्रकीर्तितम् ॥२३४॥

एतच्च दैर्घ्यमानात्पूर्वमुक्तमपि, पार्श्वतः

नवसाहस्रविस्तारं
रम्यकं च हिरण्मयम् ।

रम्यकं च हिरण्मयं चेत्यर्थः ॥

मेरोरुत्तरे वर्षस्थितिमुक्त्वा दक्षिणे क्रमेणाह

हेमकूटस्य सौम्येन
दक्षिणे निषधस्य तु ॥२३५॥

Sampath_eBooks

हरिवर्षं समाख्यातं
रौप्याभास्तत्र जन्तवः।
द्वादशैव सहस्राणि
जीवन्तीक्षुरसाशिनः ॥२३६॥
अतीव शोभनं तच्च
नवसाहस्रविस्तृतम्।

एतच्च

'यत्र नागेन शेषेण हरिराराधितस्तथा।'

इति श्रीपरायां निरुक्तम्॥

अथ

हेमकूटस्य याम्येन
हिमवतस्त्वथोत्तरे ॥२३७॥
वर्षं किंपुरुषं नाम
तत्र हेमनिभा जनाः।
नववर्षसहस्राणि
जीवन्ति प्लक्षभोजनाः ॥२३८॥
नवैव तु सहस्राणि
विस्तारस्तत्र कीर्तितः।

Sampath_eBooks

किंपुरुषम् । एतदपि

'यत्र विद्याधरी रम्या विद्याधरकरच्युता ।
किं त्वया पुरुषस्त्यक्त इत्युक्ता·········॥'

इति परायां निरुक्तम् ॥

अथ

याम्ये हिमाचलेन्द्रस्य
उत्तरे लवणोदधेः ॥२३९॥
भारतं नाम वर्षं तु
तत्र चाल्पं सुखं स्मृतम् ।

यतः

जना रोगभयत्रस्ता
दुःखिता मन्दसंपदः ॥२४०॥
सुरूपा मन्दरूपाश्च
सुभगा दुर्भगाः परे ।
भोगिनो मन्दभोगाश्च
तथान्येऽत्यन्तदुःखिताः॥२४१॥
गौराः श्यामास्तथा कृष्णा
बभ्रवः श्वेतपिङ्गलाः ।

Sampath_eBooks

वर्णजातिप्रभेदेन
नानाकर्मानुरूपतः ॥२४२॥
चतुर्वर्णा अन्त्यजाश्च
जायन्ते भारताह्वये ।

वर्णो ब्राह्मणादिः । जातिः पुलस्त्यपुलहादिगोत्ररूपा । एतदपि वर्षं

'भरतेन भृतं दुःखं यत्र पुत्रैः कुमार्गगैः ।'

इति श्रीपरायां निरुक्तम् । एवमेतानि नव वर्षाणि श्रीपरायां निरुक्तानि, इह तु इलावृताद्याख्यस्वाम्यधिष्ठितत्वादिति वक्ष्यति ॥

अत्र च

स्वदेशभाषायुक्तानि
द्वीपद्वीपान्तराणि च ॥२४३॥
पण्डिताश्च तथा मूर्खाः
शिल्पविज्ञानिनस्तथा ।
योगिनो ज्ञानिनश्चैव
धर्मिष्ठाः पापिनोऽपरे ॥२४४॥

Sampath_eBooks

याचकाश्चापि जायन्ते
दातारश्चापरे जनाः ।
प्रेष्या दासाश्च बहवो
मानवाः सततं प्रिये ॥२४५॥

द्वीपेष्वन्तर्द्वीपानि द्वीपान्तराणि । प्रेष्या विनियोज्या अदासा अपि भवन्ति ॥२४५॥

तदित्थं दोषवत्यपि
गुणस्त्वेकः स्थितस्तत्र
शुभाशुभफलार्जनम् ।

द्वयमप्यत्र संभवति । सचेतसस्तु अशुभवर्जनेन शुभार्जनाय उद्यच्छन्ति । यदुक्तं श्रीमृगेन्द्रायां

'गुण एको यदुद्युक्तो नेष्टं किंचिन्न साधयेत् ।' (१।२३)
इति ॥

किंच भारतवर्जमन्यवर्षेषु
नाष्टासु विद्यते काचि-
द्युगत्रयमयी स्थितिः ॥२४६॥

कृतयुगव्यतिरेकेण त्रेतादिमयी ॥ २४६ ॥

Sampath_eBooks

तस्मात्

चतुर्युगवती ज्ञेया
भारताख्ये वरानने ।

एवं च

तत्रैव यत्कृतं कर्म
शुभं वा यदि वाशुभम् ॥२४७॥
वसन्ति तेन लोकाश्च
शिवाद्यवीचिमध्यगाः ।

अत्रैव भोगमोक्षसिद्धिसाधनस्वयंभूपुण्यतीर्थमहानदीसंपदस्तीत्याह

महाकालस्तथैकाम्र-
मेवमादि वरानने ॥२४८॥
तीर्थानां कोटिरुद्दिष्टा
महापुण्यफलोदया ।
गङ्गादीनां नदीनां च
तत्र पञ्च शतानि च ॥२४९॥

एवमादीत्यादिशब्दात् श्रीअमरेशादिपञ्चाष्टकानां वाराणस्यादिगतश्रीमहादेवाष्टषष्टेश्च

Sampath_eBooks

परिग्रहः । तीर्थानामिति प्रभासादीनाम् । यदुक्तं श्रीदेवीयामले

'प्रभासाद्या तु तीर्थानां कोटिरेका वरानने ।
पञ्चाष्टकं तु तत्रैव लोकानुग्राहकं सदा ॥'

इति ॥ २४९ ॥

कुरुवर्षं च

नवयोजनसाहस्रं
धन्वाकारं निबोध तम् ।

भारते च वर्षे

नव भेदाः स्मृतास्तत्र
सागरान्तरिताः प्रिये ॥२५०॥

हिमवद्दैर्घ्येण अवतारितैः सामुद्रैर्वारिभिः कृतव्यवधानाः । अत्र चाष्टमो वारिदेशो बिन्दुसरःसंज्ञः । यद्वक्ष्यति

'बिन्दुसरःप्रभृत्येव कुमार्यान्तं········ ।' (२५४)

इति ॥ २५० ॥

तदत्र योजनानाम्

एकैकस्य तु द्वीपस्य
सहस्रं परिकीर्तितम् ।

Sampath_eBooks

जलेन सह मानमेतदित्यर्थः ॥

यदाह

शतानि पञ्च विज्ञेयं
स्थलं पञ्च जलं तथा ॥२५१॥

एतत् पार्श्वमानम् । दैर्घ्यं तु हिमवद्यथानु-पातमर्धं पञ्चशतिकजलव्यवहितत्वात् ॥२५१॥

एवं च

परस्परमगम्यास्ते

ते इति द्वीपविशेषाः ॥

तेषां नामानि मे शृणु ।
इन्द्रद्वीपं कशेरुं च
ताम्रवर्णं गभस्तिमत् ॥२५२॥
नागद्वीपं च सौम्यं च
गान्धर्वं वारुणं तथा ।
द्वीपं कुमारिकाख्यं च
नवमं परिकीर्तितम् ॥२५३॥

द्वीपाष्टकस्य सागराः सप्त व्यवधायका

Sampath_eBooks

उक्ताः । नवमस्य तु अवधिनिरूपणेन व्यवधायकमाह

बिन्दुसरःप्रभृत्येव
कुमार्याह्वं प्रकीर्तितम् ।

पूर्वेभ्योऽस्यायं विशेषः, यद्यं

योजनानां सहस्रं तु

नेतरवत्पञ्चशतिकम् । केवलं साहस्रिकस्यास्य विभागो वारुणान्तस्थेन बिन्दुसरसा कृतः ॥

एतच्च

नानावर्णाश्रमान्वितम् ॥२५४॥

वर्णाः ब्राह्मणाद्याः ॥२५४ ॥

किंच

ये पूर्वोक्ता गुणा लोके
भारते वरवर्णिनि ।
ते तत्रैव स्थिता लोके
कुमारीसंज्ञके प्रिये ॥२५५॥

गुणाः शुभार्जनस्वयंभूतीर्थपुण्यनद्यधिष्ठा-

Sampath_eBooks

नादिरूपाः कुमारीद्वीप एव। यदुक्तं श्रीश्रीकण्ठ्यां

'तत्र मध्ये महद्वीपं कुमारीद्वीपसंज्ञकम्।
तत्र रुद्रशतं पूर्णमवतीर्णं शुभङ्करम्।
पशूनां हेतुभूतं च स्मरणात्पापनाशनम्॥'

इति। इन्द्रद्वीपादिस्तु म्लेच्छादिप्रायाणां निवासो देवतातीर्थाद्यनधिष्ठितश्च। तदुक्तमन्यत्र

'वर्णाश्रमसमाचारः कुमार्याख्ये न संशयः।
इतरे म्लेच्छसंज्ञेयाः शिष्टाचारबहिष्कृताः॥'

इति ॥२५५॥

अन्यच्च

भूधराः सप्त विज्ञेया-
स्तत्रैव तु सुशोभनाः।
महेन्द्रो मलयः सह्यः
शक्तिमानृक्षपर्वतः ॥२५६॥
विन्ध्यश्च पारियात्रश्च
भान्त्येते कुलपर्वताः।

सुशोभनाः सिद्धिसाधनानुगुणाः। केतुमालस्थात्पारियात्रादयमन्यः। एवमन्यत्र ॥

Sampath_eBooks

अथ

दक्षसागरमध्यस्था-
न्युपद्वीपानि षट् प्रिये ॥२५७॥

तान्याह

अङ्गद्वीपं यवाख्यं च
मलयं शङ्खसंज्ञकम् ।
कुमुदं च वराहं च
इत्येवं परिकीर्तितम् ॥२५८॥

एषां मध्यात्

कथितो मलयद्वीपे
मलयो नाम पर्वतः ।
तस्य पादे त्रिकूटो वै
लङ्का तस्योपरिस्थिता ॥२५९॥

पादे पर्यन्ते ॥२५९॥

सा च

चामीकरमयी शुभ्रा
चत्वरोद्यानमण्डिता ।

चत्वरैः शिवाधिष्ठितैश्चतुष्पथैर्मुक्तिदैः, उद्यानैश्च भोगस्थानैर्भूषिता ॥

Sampath_eBooks

तथा

चित्रप्राकाररचिता
वज्रवैडूर्यमण्डिता ॥२६०॥
अनन्तविभवास्तत्र
राक्षसा देवकन्यकाः ।
रमन्ते कन्यकासक्ता
महाबलपराक्रमाः ॥२६१॥

पराक्रमः उत्साहः ॥२६१॥

अन्यच्च

अगस्त्यशिखरं तत्र
मलये भूधरोत्तमे ।
तत्राश्रमो महापुण्य
आगस्त्यः स्फटिकप्रभः॥२६२॥
तत्रान्योन्यविरुद्धास्तु
सत्त्वाः क्रीडन्त्यशङ्किताः ।
न तत्र जायते मारी
नाकालः संप्रवर्तते ॥२६३॥

Sampath_eBooks

न जरा नच शोकश्च
नोपसर्गभयं क्वचित् ।

मारी बहुमरणम् । अकालो वर्षातपवैपरीत्यम् । उपसर्गा व्याधयः ॥

किंच

न वदत्यनृतं कश्चि-
द्रागद्वेषौ न कुत्रचित् ॥२६४॥
अगस्त्यस्य प्रभावेण
त्वज्ञानं दूरतो गतम् ।
तत्र वै ऋषयो वीरा
ज्ञानयोगकृताश्रमाः ॥२६५॥
जपाध्ययनहोमादि-
पूजास्तुतिपरायणाः ।
त्र्यम्बकस्य महादेवि
नित्यमाराधने रताः ॥२६६॥
अगस्त्यसहिताः सर्वे
मोक्षाभ्युदयवादिनः ।

Sampath_eBooks

तिष्ठन्ति भावितात्मानः
शापानुग्रहकारिणः ॥२६७॥

मोक्षमेवाभ्युदयं वदन्ति तच्छीलाः । भावितः शिवत्वं प्रापित आत्मा यैः ॥२६७॥

उपसंहरति

लक्षयोजनविस्तीर्णं
जम्बुद्वीपं समन्ततः ।

पूर्वपश्चिमतः प्राग्दर्शितं दक्षिणोत्तरतस्तूच्यते । कुरुहिरण्मयरम्यकहरिकिंपुरुषभारतवर्षाणि षट् प्रत्येकं नवसहस्राणि,—इति चतुष्पञ्चाशत्, प्रत्येकं द्विसाहस्रिकाः शृङ्गवच्छ्वेतनीलहेमकूटनिषधहिमवन्तः,—इति द्वादश, मेरोः सव्यापसव्यगतमिलावृतमष्टादश, मेरोः षोडश सहस्राणि,—इत्येवं लक्षयोजनं जम्बुद्वीपं भवति ॥

अस्य च

लक्षयोजनविस्तीर्णं
लवणाम्भः स्थितं बहिः ॥२६८

लवणाम्भः क्षारसमुद्रः ॥ २६८ ॥

Sampath_eBooks

तच्च

त्रिगुणं परिणाहेन
स्थितं वै मण्डलाकृति ।

उक्तं च श्रीमलये

'सर्वत्र त्रिगुणो नाहः··············· ।'

इति ॥

किंच

वृत्रारिभयसंत्रस्ताः
प्रविष्टास्तत्र पर्वताः ॥२६९॥
द्वादशैव महावीर्या-
स्तान्ब्रवीमि समासतः ।

वृत्रारिरिन्द्रः ॥

तानाह

वृषभो दुन्दुभिर्धूम्रः
प्रविष्टाः पूर्वभागतः ॥२७०॥
चन्द्रः कङ्कस्तथा द्रोणः
प्रविष्टा उत्तरेण तु ।
अशोकोऽथ वराहश्च
नन्दनश्च तृतीयकः ॥२७१॥

Sampath_eBooks

अपरेण नगास्तत्र
प्रविष्टा लवणोदधिम् ।
चक्रो मैनाकसंज्ञश्च
तृतीयस्तु बलाहकः ॥२७२॥
दक्षिणेन वरारोहे
प्रविष्टाश्चैव भूधराः ।

अत्र च

चक्रमैनाकयोर्मध्ये
तिष्ठेद्वै वडवामुखः ॥२७३॥

तदेवमब्धिपरिवृतं

जम्बुद्वीपं समाख्यातं

अथैषां वर्षाणामिलावृतादिनामकस्वाम्यधिष्ठानादेव ताः संज्ञा इति देवतासंज्ञानामुत्पत्तिहेतुरूपं प्रभवं दर्शयितुमुपक्रमते

प्रभवस्त्वधुनोच्यते ।

तत्राद्यो भूपतिः

Sampath_eBooks

स्वायंभुवो मनुर्नाम

अभूत् ॥

तस्य पुत्रः प्रियव्रतः ॥२७४॥

तस्याथ दश पुत्रा वै

जाता वीर्यबलोत्कटाः ।

अग्नीध्रश्चाग्निबाहुश्च

मेधा मेधातिथिर्वपुः ॥२७५॥

ज्योतिष्मान् द्युतिमान् हव्यः

सवनः सत्र एव च ।

एषां मध्यात्

मेधाः सत्रोऽग्निबाहुश्च

एते प्रव्रजितास्त्रयः ॥२७६॥

सप्तद्वीपेषु ये शेषा

अभिषिक्ता महाबलाः ।

तत्र

जम्बुद्वीपे तथाग्नीध्रः

तथेत्यभिषिक्तः ॥

तस्य पुत्रा नव स्मृताः ॥२७७॥

Sampath_eBooks

नाभिः किंपुरुषश्चैव
हरिश्चैव इलावृतः ।
भद्राश्वः केतुमालश्च
रम्यकश्च हिरण्मयः ॥२७८॥
नवमस्तु कुरुर्नाम

एते
नववर्षाधिपाः स्मृताः ।
अग्नीध्रतस्तु जाता वै
शूराश्चातिबलोत्कटाः ॥२७९॥
तेषां नामाङ्कितानीह
नववर्षाणि पार्वति ।

तत्र भारतं वर्षं प्रथमं नाभिनामाङ्कितमभूत् ॥

पश्चात् तु
नाभेः पुत्रो महावीर्यो
वृषभो धर्मतत्परः ॥२८०॥
तस्यापि हि सुतो ज्ञेयो
भरतस्तु प्रतापवान् ।

Sampath_eBooks

तन्नाम्नैव तु विज्ञेयं
भारतं वर्षमुत्तमम् ॥ २८१॥

अथ

तस्याप्यष्टौ पुनः पुत्रा
जाता कन्यापरा प्रिये ।

तेषां मध्यात्

भारते त्वष्टद्वीपेऽत्र
अष्टौ पुत्रा निवेशिताः ॥२८२॥
नवमस्तु कुमार्याह्वः
कुमार्यां प्रतिपादितः ।

कन्याप्रतिपादनादेव कुमार्याह्वः ॥

ततश्च

तेषां नाम्ना तु ते द्वीपा
भरतेन प्रकीर्तिताः ॥२८३॥

ये पूर्वम्

'इन्द्रश्चैव कशेरुश्च………………।'

इत्युक्ताः ॥ २८३ ॥

तदेवं सप्तदशधाविभक्तजम्बुद्वीपानुवाद-पूर्वं द्वीपान्तराण्याह

Sampath_eBooks

जम्बुद्वीपं च शाकं च
कुशं क्रौञ्चं च शाल्मलिम् ।
गोमेदं पुष्करं चैव
सप्त द्वीपानि पार्वति ॥२८४॥

यैः समुद्रैर्वलयितानि द्वीपानि, तान्

अधुना संप्रवक्ष्यामि
समुद्रांस्तव सुव्रते ।
क्षारः क्षीरं दधि घृतं
तथा इक्षुरसोऽपि च ॥२८५॥
मदिरोदश्च स्वादूदः
समुद्राः सप्त कीर्तिताः ।

प्रोक्तद्वीपानुसारमेते यथोक्तक्रमेणैव स्थिताः सर्वेषु पारमेशेषु एवमेवोक्तत्वात् । तेनेक्षुरससुराघृतदधिक्षीरस्वादूदका इति पातञ्जले यः क्रमो दृश्यते, स लेखकदोषाद्विपर्यस्त इति मन्तव्यम् ॥

अथोक्तजम्बुद्वीपप्रमाणानुवादेनैषां द्वीपसमुद्राणां प्रमाणमाह

Sampath_eBooks

जम्बुद्वीपं स्मृतं लक्षं
योजनानां प्रमाणतः ॥२८६॥
परिमण्डलतो ज्ञेयः
क्षारोदस्तत्समो बहिः ।

परिमण्डलत इति वैपुल्यात् ॥

एवं द्विगुणवृद्ध्यात्र
समुद्रा द्वीपसंस्थिताः ॥२८७॥

संस्थिता इति संशब्दः सहार्थे । तेन शाकादिभिः द्वीपैः सह क्षीरादिसमुद्राः क्रमात् द्विगुणवृद्ध्या स्थिताः । तद्यथा शाकद्वीपं द्वे लक्षे, तथा क्षीराब्धिः । कुशद्वीपं लक्षाणि चत्वारि, तथैव दध्यब्धिः। क्रौञ्चमष्टौ, तथैवच घृताब्धिः। शाल्मलिः षोडश, तद्वदिक्षुरसाब्धिः । गोमेदो द्वात्रिंशत्, तद्वत् मदिराब्धिः । पुष्करश्चतुष्षष्टिः, तथैव स्वादूदः । एतच्च द्वीपसमानत्वमब्धीनामुपसंहरिष्यति

'पुष्करद्वीपगुणितः स्वादूदोऽन्ते व्यवस्थितः।' (१०।३२७)
इति। इत्थं च मेर्वर्धात् स्वादूदान्तं कोटिद्वय

Sampath_eBooks

त्रिपञ्चाशल्लक्षाणि पञ्चाशच्च सहस्राणि भवन्ति।
यद्वक्ष्यति

'पञ्चाशच्च सहस्राणि त्रिपञ्चाशत्तथैवच ।
योजनानां तु लक्षाणि कोटिद्वितयमेवच ॥
मेर्वर्धाद्यावत्स्वादूदं प्रमाणं परिकीर्तितम् ।' (१०।३२८)

इति ॥ २८७ ॥

तथाच

अग्नीध्रश्च समाख्यातो
जम्बुद्वीपे वरानने ।

तथा

शाके मेधातिथिर्नाम
वपुष्मान् कुशसंज्ञके ॥ २८८ ॥
राजा क्रौञ्चेऽथ ज्योतिष्मान्
शाल्मलौ द्युतिमान्स्मृतः ।
गोमेदे हव्यनामा तु
सवनः पुष्करे तथा ॥ २८९ ॥

किंच

त्रेतायुगसमः कालः
शाकगोमेदवासिनाम् ।

Sampath_eBooks

तथा वर्णाश्रमाचारा
ज्ञेयास्तत्रनिवासिनाम् ॥२९०॥

तथेति त्रेतायुगानुगुणाः । अन्यत्र विशेषानभिधानात् चतुर्युगसमत्वं संभाव्यते ॥ २९० ॥

शाकादिद्वीपविभागान्तरमाह

मेधातिथेः सप्त पुत्राः
शाकद्वीपेऽभिषेचिताः ।
शान्तोऽभयस्त्वशिशिरः
सुखदो नन्दकः शिवः ॥२९१॥
क्षेमकश्च ध्रुवश्चेति
वर्षनाम्ना तु तेऽङ्किताः ।

प्रसिद्धवर्षनामानुसारीणि तेषां नामानीत्यर्थः ॥

वर्षाणि सप्त ख्यातानि
तत्प्रविभागहेतून्
पर्वतांश्च निबोध मे ॥ २९२ ॥
गोमेदश्चन्द्रसंज्ञश्च
नारदो दुन्दुभिस्तथा ।

Sampath_eBooks

सोमक ऋषभश्चैव
वैभ्राजश्च कुलाद्रयः ॥ २९३ ॥

एते च शाकद्वीपस्य पार्श्वमानविभागेन स्थिताः सप्तधात्वं कुर्वन्ति । एवमन्यत्र ॥२९३॥

किंच

सुकृता चानसूया च
सुमुखी च तृतीयका ।
विपाशा त्रिदिवा कुम्भी
तथा चामृतनालिका ॥२९४॥

एता एव महानद्यो
गिरिष्वेतेषु निर्गताः ।

संस्थिताः सत्य एभ्यो निर्गता इत्यर्थः ॥

एताश्च

पूर्वादारभ्य निष्क्रान्ताः
प्रविष्टाः क्षीरसागरम् ॥२९५॥

अत्र च

शाकद्वीपे तु ये लोकाः
क्षीराहाराः फलाशिनः ।

Sampath_eBooks

अतश्च

चन्द्रकान्तसमाः सर्वे
सुरूपाः प्रियदर्शनाः ॥ २९६ ॥
क्रीडन्ति दिव्यनारीभिः
सर्वैश्वर्यसमन्विताः ।

तदेवं

कुशे वपुष्मता पूर्वं
सप्त पुत्रा निवेशिताः ॥ २९७ ॥
श्वेतलोहितजीमूता
हरितो वैद्युतस्तथा ।
मानसः सुव्रतश्चेति
वर्षनाम्नैव चाङ्किताः ॥ २९८ ॥

अत्र च विभागहेतवः

कुमुदश्चोर्वदश्चैव
वाराहो द्रोणकङ्कतौ ।
महिषः कुसुमश्चैव
सप्त सीमान्तपर्वताः ॥ २९९ ॥

Sampath_eBooks

अत्र च

श्वेततोया तथा कृष्णा
चन्द्रा शुक्ला च लोचनी।
वीवृता च विवृन्दा च
सप्तैतास्तु सरिद्वराः ॥३००॥
दध्युदकं प्रविष्टास्ता
निम्नगाः पावनोदकाः ।
जनास्तु सुखिनस्तत्र
दध्नामृतफलाशिनः ॥ ३०१ ॥
दिव्यभोगरताः सर्वे
क्रीडन्त्येते सयोषितः ।

दध्ना सह अमृतमयानि फलानि चाश्नन्ति। एवमुत्तरत्र ॥

ज्योतिष्मता सप्त पुत्राः
क्रौञ्चद्वीपे निवेशिताः ॥ ३०२ ॥
उद्भिज्जश्च समाख्यातो
वेणुर्मण्डल एवच्च ।

Sampath_eBooks

रथकारश्च लवणो
धृतिमान्सुप्रभाकरः ॥ ३०३ ॥
कपिलश्चेति राजानो
वर्षनाम्ना च तेऽङ्किताः ।
अत्रापि विभागहेतवः
वैद्रुमो हेमनाभश्च
द्युतिमान् पुष्पदन्तकः ॥३०४॥
कुशलो हरिमर्दश्च
सप्तैते तु कुलाद्रयः ।
तेभ्यः
मही धाता शिवापापा
पवित्रा संततद्युतिः ॥३०५॥
दम्भा चेति समाख्याताः
सप्तैताः सरितः स्रुताः ।
घृतोदं प्रविशन्त्येताः
सर्वाः पापहराः प्रिये ॥ ३०६ ॥
जनास्तद्वासिनः सर्वे
सुरूपास्तेजसोत्कटाः ।

Sampath_eBooks

घृतामृतफलाहाराः
सुतृप्ताः स्मरपीडिताः ॥३०७॥
क्रीडन्ति वनितायुक्ताः
पद्मपत्रायतेक्षणाः ।

स्मरपीडितत्वं संभोगैकनिष्ठत्वम् ॥

तथा

सप्त द्युतिमता पुत्राः
शाल्मलावभिषेचिताः ॥३०८॥
मनोनुगस्तथोष्णश्च
पावनो ह्यन्धकारकः ।
मुनिर्दुन्दुभिनामा च
कुशलश्चेति ते स्मृताः ॥३०९॥
वर्षनामानि तेषां वै
सप्तानां सप्त तु क्रमात् ।
क्रौञ्चोऽथ वामनश्चैवा-
प्यन्धकारो दिवाकृतिः ॥३१०॥
द्विबिन्दुः पुण्डरीकश्च
दुन्दुभिश्च कुलाद्रयः ।

Sampath_eBooks

पौण्डरी कौशिकी गौरी
सिद्धा चैव कुमुद्वती ॥३११॥
सन्ध्या रात्री च विख्याता
समासात्परिकीर्तिताः ।
नद्यस्ताः शैलनिष्क्रान्ता
गच्छन्तीक्षुरसार्णवम् ॥३१२॥
पिवन्तीक्षुरसं तत्र
ये जनास्तन्निवासिनः ।
दिव्यकान्तियुताः शान्ताः
सुरूपाः प्रियवादिनः ॥३१३॥
नानानारीसमाकीर्णाः
सर्वकामसुखोदयाः ।
एवं
हव्यराजः सुतान्सप्त
गोमोदे चाभ्यषेचयत् ॥३१४॥
जलदश्च कुमारश्च
सुकुमारो मरीचकः ।

Sampath_eBooks

कुमुदश्चोन्नतश्चैव
महाभद्र इति स्मृताः ॥३१५॥
तेषां नाम्ना च वर्षाणि
अङ्कितानि स्वनामतः ।
उदयः केसरश्चैव
जठरोऽथ सुरैवतः ॥३१६॥
श्यामोऽम्बिकेयो मेरुश्च
शैलाः सीमान्तगास्त्विमे ।
गभस्ती सुकुमारी च
कुमारी नलिनी तथा ॥३१७॥
वेणुका चाप्यथेक्षू च
धेनुकेति सरिद्वराः ।
मदिरोदं वहन्त्येताः
पुण्याः पुण्यजलोद्वहाः ॥३१८॥
अमृतोपमानि स्वादूनि
फलान्यत्र वरानने ।
भक्षयन्ति च तल्लोकाः
पिवन्ति मदिरामृतम् ॥ ३१९ ॥

Sampath_eBooks

मदिरोमिदति 'कालभावगन्तव्याध्वानः कर्मसंज्ञाः' ॥ ३१९ ॥

ते च

सर्वकामसमृद्धाश्च
सुरूपा व्याधिवर्जिताः ।
नानायुवतिवृन्दैश्च
रूपयौवनगर्वितैः ॥३२०॥
मदालसैः पानमत्तै
रमन्ते सततं प्रिये ।
अतश्च पुष्कराख्ये च
सवनस्तत्र नायकः ॥ ३२१ ॥
द्वौ पुत्रौ तेन विख्यातौ
पुष्कराख्ये निवेशितौ ।

वक्ष्यमाणसंज्ञौ ॥

तत्र च

पर्वतो वलयाकारो
मानसोत्तरसंज्ञितः ॥३२२॥

Sampath_eBooks

पञ्चाशदुच्छ्रयस्तस्य
विस्तारः पञ्चविंशतिः ।
योजनानां वरारोहे

स च

सर्वरत्नसमन्वितः ॥ ३२३ ॥

तेन द्विधाकृते देशे सति

धातकी मध्यमे राजा
महवीतो बहिर्नृपः ।

मध्यम इति भूगोलापेक्षया ॥

अत्र च

ईर्ष्यया रागतृष्णाभि-
रीतिभिश्च विवर्जिताः ॥ ३२४ ॥

ईतय आधिदैविकदुःखहेतवः ॥ ३२४ ॥

अत एव

सर्वे ते सुखिनस्तत्र
तस्मिन्वर्षद्वये जनाः ।

स च पर्वतः

Sampath_eBooks

चक्राकारस्तु बोद्धव्यो
मानसस्तु वरानने ॥ ३२५ ॥

अथ

चतुर्णां लोकपालानां
पुरीस्त्वत्र ब्रवीमि ते ।

अत्रेति पर्वते ॥

तत्र पूर्वादिक्रमेण

हरेर्वस्वेकसाराख्या
याम्या संयमिनी पुरी ॥३२६॥
सुखाह्वा वारुणी चैव
सोमस्य तु विभावरी ।

पूर्वोद्दिष्टस्वरूपमानमेव स्वादोदस्येति सारयति ॥

पुष्करद्वीपगुणितः
स्वादूदोऽन्ते व्यवस्थितः ३२७

गुणित इति क्रमद्विगुणवृद्ध्या चतुःषष्टिलक्षसंख्यो यथा विभक्तं प्राक् ॥

Sampath_eBooks

तदित्थं मेरुमध्यात् स्वादूदान्तमुक्तं प्रमाणं संकलयति

पञ्चाशत्तु सहस्राणि
त्रिपञ्चाशत्तथैव च ।
योजनानां तु लक्षाणि
कोटिद्वितयमेव च ॥ ३२८ ॥
मेर्वर्धाद्यावत्स्वादूदं
प्रमाणं परिकीर्तितम् ।

एतत्प्रागेव व्याख्यातम् ॥

ततो हेममयी भूमि-
र्दश कोट्यो वरानने ॥ ३२९ ॥
देवानां क्रीडनार्थाय
लोकालोकस्त्वतः परम् ।
पर्वतो[1] वलयाकारो
योजनायुतविस्तृतः ॥३३०॥
लक्षमात्रसमुत्सेधो
योजनानां वरानने ।

अयुतं दशसहस्राणि ॥

१ 'सर्वतो' क पाठः ।

Sampath_eBooks

स च

सर्वरत्नसमोपेतो
हेमवर्णः प्रकीर्तितः ॥३३१॥

किंच

तस्यान्तर्भासयेद्भानु-
र्न बहिः सुरसुन्दरि ।

लोकोऽन्तःस्थितानां चतुर्दशभूतात्मनां लोकानामालोको यत्र । यद्वा लोकः प्रकाशोऽलोकश्च तमोऽन्तर्बहिश्च यस्य स लोकालोकः, आदित्यस्य लोकालोकसमानोच्छ्रायत्वात् मेरोस्त[1]दन्तरालवर्तित्वाच्च न तद्बहिर्भासकत्वम् ॥

अन्यच्च

लोकपालाः स्थितास्तत्र
रुद्राश्चामोघशक्तयः ॥३३२॥

च एवार्थे । रुद्रा एव भगवन्तोऽन्तर्वर्तिसमग्रलोकपालास्तत्र स्थिताः न तु तावदध्वपालने इन्द्रादीनां सामर्थ्यमस्ति, अतो रुद्राणामेवात्र नियोगः । इन्द्रादयस्तु भगवच्छक्तिमयामोघ-

१ 'मेरुत' ख. पाठः ।

Sampath_eBooks

शक्त्या एतद्रुद्रांशाधिष्ठानादेव लोकपाला उच्यन्ते, अत एव भगवदावरणत्वेन पूज्यत्वमेषाम् ॥

एतान्नामत उद्दिशति

विरुजो वसुधामा च
शंखपात् कर्दमस्तथा ।
हिरण्यरोमा पर्जन्यः
केतुमान् [1]भाजनस्तथा ॥३३३॥

एते

जाम्बूनदमये शुभ्रे
सिद्धामरनिवेशने ।
पूर्वादारभ्य क्रमशो
यावदीशानगोचराः ॥ ३३४ ॥
लोकपालाः स्थितास्ते वै
पालयन्त इमाः प्रजाः ।

सिद्धानां योगिनाममराणां च निवेशनेऽर्धस्थितिधाम्नि । इमा इति, अन्तर्द्वीपवर्तिचतुर्दशविधभूतसर्गात्मनः ॥

---

१ 'राजसः' क.

Sampath_eBooks

तदाह

अस्य मध्ये वरारोहे
योनयस्तु चतुर्दश ॥ ३३५ ॥
चेष्टन्ते विविधाकाराः
स्वकर्मपरिरञ्जिताः ।

यदुक्तम्

'तस्मान्तर्भासयेद्भानु··················॥'

इति तस्य लोकालोकसंनिकर्षविप्रकर्षोन्मिषितगतिवैचित्र्येण दक्षिणोत्तरायणस्थितिमादिशति

लोकालोकोपरिष्टात्तु
सवितुर्दक्षिणायनम् ॥ ३३६ ॥
तथोत्तरायणं तत्र
उत्तरेण प्रकीर्तितम् ।

इह मेरुलोकालोकयोरन्तर्वर्तिगगनपथमध्ये संचरन्[1] भूपीठिकाप्रतिष्ठितलिङ्गमूर्तिमेरुम्[2]नवरतं परमेश्वरनियतिनियन्त्रितषष्टिघटिकात्मना

---

१ 'चरभू' क. २ 'मूर्तिं मे' क.

Sampath_eBooks

बाह्यकालेन प्रदक्षिणयन् ध्रुवनाभिनिबद्धभचक्रसंचारिग्रहमध्यगो ग्रहग्रामणीः तत्तद्राशिसंचारानुसारितत्तद्वत्तसहभावादाश्रिततीव्रमन्दमन्दादिदीप्तिभेदोऽन्योन्यरूपो भूतसर्गवर्तनीं विचित्रां वर्तयति। अतश्च स विभुः लोकालोकोपरिष्टादिति तन्नैकट्येन भ्रमणात्। तत्रेति, लोकालोकमेर्वन्तरालवर्तिनि विषये स्थित्वा क्रमात्क्रमं मेरुनिकटाद्बहिर्निःसरणेन भ्रमणात् कर्कटादिराशिषट्कसंचाररूपं दक्षिणायनं, लोकालोकसंनिकर्षान्मेरुनैकट्येन अन्तरन्तः प्रवेशात्मनोत्तरेण भ्रमणान्मकरादिसंचाररूपं तूत्तरायणं भवति। वक्ष्यति हि

'सर्वेषामुत्तरे मेरुर्लोकालोकस्तु दक्षिणे।'

इति। एवं संगतागमिकप्रक्रियथैव एतद्व्याख्येयं नतु परस्परविसंवादिज्योतिःशास्त्रमतानुसरणसंगत्या॥

एवं दक्षिणोत्तरायणस्थितिमुक्त्वा उदयास्तमयभेदमाह

अर्धरात्रोऽमरावत्या-
मस्तमेति यमस्य च॥ ३३७॥

१ 'मन्दामन्दादिभेदः' क. २ 'वर्तिनीं' ख. ३ 'न्तरेण'. क. ४ 'रूपं' क.

Sampath_eBooks

मध्याह्नश्चैव वारुण्यां
सौम्ये सूर्योदयः स्मृतः ।
यदैव चामरावत्या-
मुदयस्तस्य दृश्यते ॥ ३३८ ॥
तदास्तमेति वारुण्या-
मित्यादित्यगतागतम् ।

निर्दिष्टनीत्या मेरुं प्रदक्षिणयतः सूर्यस्य यदा सौम्य इति मेरोरुत्तरे भागे उदयो वारुण्या आगच्छतो दर्शनं तदा मेरुतत्पार्श्वस्थप्रोक्तपर्वतच्छायावशात् यमस्य दिशि सूर्योऽस्तमेति, न दृश्यते तत्प्रकाश इत्यर्थः । तदैव च वारुण्यां दिशि मध्याह्नः, तत्पूर्वगस्यार्कस्योदयदेशात् दक्षिणादिशः पञ्चदशघटिकावधेर्गतेः संपन्नत्वात् तदैव त्वमरावत्यामर्धरात्रः, घटिकापञ्चदशकेन अत्र सूर्योदयस्य भविष्यत्त्वात् । इत्थं च यदैवामरावत्यामस्योदयः तदैव वारुणीवर्तिनां सौरस्य त्रिंशद्घटिकावाहस्य जातत्वात् वारुण्यां सूर्योऽस्तमेति दिनान्तो जा-

१ 'तद्वत्' ख. पाठः ।

Sampath_eBooks

यते, इत्यनेन प्रकारेणादित्यगतागतं विदिक्ष्वपि मन्तव्यं प्रतिपादितक्रमस्य उपलक्षणभूतत्वात्॥

अत्र च

सुवीथी उत्तरे तस्य
अजवीथी च दक्षिणे ॥२३९॥

एतद् व्याचष्टे

पितृदेवपथो ह्येष
कथितस्तु मया तव।

शोभना वीथी मार्गो[1] देवपथः। न जाता उत्पत्तिस्थाने संप्रति न किमपि प्राप्ता इत्यजाः पितरः तेषां वीथी पन्था इति यथासंभवं योज्यम्। उत्तरायणस्य दिव्यसिद्धिहेतुत्वात् देवमार्गता, दक्षिणायनस्य तु ऐहिकसिद्धिपूरकत्वात् पितृमार्गतेत्यर्थः। एतच्च कालाधिकारोक्तनीत्या अन्तरिव बहिरपि ज्ञेयम्। यदुक्तं गीतासु

'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
अनयोर्यात्यनावृत्तिमेकयावर्ततेऽन्यया॥'

---

१ 'देवमार्गः' ख. पाठः।

Sampath_eBooks

इति। अन्तरपि हृत्पद्मकर्णिकैव मेरुः, तदुपरि चिज्ज्योतिर्मात्ररूपस्यात्मनो ध्रुवस्यानुलग्नः प्राणादित्यः कालाकारोक्तसकलभचक्रग्रहाद्यनुयातः कर्णिकोपकण्ठगतप्रधाननाडीमुखस्पर्शेन प्रदक्षिणमनारतमावर्तमानस्तिष्ठन् तत्तन्मकरादिसंक्रान्तिक्रमेण उत्तरदक्षिणादिविभागं दर्शयतीत्युक्तप्रायम्। यतश्च मेरुं (मेरुलोकालोकान्तरालस्थव्योमपथमध्येन) प्रदक्षिणयति अनिशं दिनेशः तत एव तदुदयस्थानात्मकपूर्वदिगभिमुखानां इलावृतवर्जप्रतिपादितवर्षाष्टकद्वीपान्तरादिस्थानां जनानां सर्वेषामुत्तरे मेरुर्लोकालोकस्तु दक्षिणे । मेरुं प्रदक्षिणयन् हि भास्करः तत्पश्चात्केतुमालादिवासिनां मेरोर्दक्षिणत उदेति, तदुत्तरस्थकुरुवर्षादिवासिनां पश्चिमतः, तत्पूर्वभद्राश्वादिवासिनामुत्तरतः, तद्दक्षिणहरिवर्षादिनिष्ठानां पूर्वत इति स्थित्या सर्वेषां द्वीपान्तरगतानामपि मेरुलोकालोकौ उदग्दक्षिणस्थौ भवतः इलावृतवर्जं, तत्रापि वा

१ 'कालाधिका' ख. २ 'नागतं' क.

Sampath_eBooks

छायामात्रेण सूर्यप्रकाशानुसारिणी काचिदवस्थितिरस्तीति कल्पनीयम् ॥

एवं प्रसङ्गात् दक्षिणोत्तरायणे उदयास्तमयस्थितिं च प्रतिपाद्य प्रकृतमाह

अस्य बाह्ये तमो घोरं
दुःप्रेक्ष्यं जीववर्जितम् ॥३४०॥
पञ्चत्रिंशत्स्मृताः कोट्यो
लक्षाण्येकोनविंशतिः ।
चत्वारिंशत्सहस्राणि
योजनानां वरानने ॥३४१॥

लोकालोकविष्कम्भो दश सहस्राण्युक्तः तैः सह पञ्चाशत् मेर्वर्वाक्[1] जम्बुद्वीपः । पञ्चाशदित्यनेन लक्षेण प्राक्संकलनासंकलितेन कोटिद्वयेन हेमभूकोटिदशकेन च सह सप्तचत्वारिंशत्कोटयो भवन्ति ॥ ३४१ ॥

अथ

सप्तसागरमानं तु
गर्भोदस्तत्समः स्मृतः ।

१ 'मेर्वधात्' ख.

Sampath_eBooks

गर्भेऽन्तः सप्तसागरसंबन्ध्युदकोपलक्षित-लोकालोकतमःपर्यन्तं विश्वं यस्य स गर्भोदः। तत्सम इति क्षारा[1]ब्धिरसतुल्यः। यदुक्तं परातन्त्रे

'गदिता येऽब्धयः सप्त तेऽत्र गर्भे यतः स्थिताः।
प्रथितस्तेन गर्भोदः समस्ताब्धिरसोद्वहः॥'

इति। स च सप्तानां क्षारादिसागराणामेकलक्षात् प्रभृति द्विगुणवृद्ध्या यन्मानं कोटिरेका सप्तविंशतिर्लक्षाणि तत्तुल्यमानः। एवमियदवधि प्राक्तनेन मानेन सह एको[2]नपञ्चाशत्कोटयो भवन्ति। ब्रह्माण्डकर्परिका च कोटिरिति पञ्चाशत्कोटयो मेरुमध्यात् कर्परिकान्तम्॥

तदाह

ब्रह्मणोऽण्डकटाहेन
युक्ता वै मेरुमध्यतः॥ ३४२॥
पञ्चाशत्कोटयो ज्ञेया
दशदिक्षु समन्ततः।
उभयपार्श्वकलनया तु

---

१ 'क्षारादिसर्वाब्धि' ख. २ 'एकान्त' क.

Sampath_eBooks

एवमेतच्छतं ज्ञेयं
कोटीनां पार्थिवं महत् ॥३४३॥

पार्थिवमिति पृथ्वीगतं वैपुल्यम् ॥३४३॥

एवं पृथिव्या अधो मध्ये मानमुक्तं, अधुना तु

अत ऊर्ध्वं प्रवक्ष्यामि
प्रमाणं वरवर्णिनि ।

ऊर्ध्वमिति भुवर्लोकाधिगतम् ॥

आस्तां वैतत्, भूर्लोकगतभुवनशुद्धौ पूर्वोक्तसंस्कारक्रमं मा विस्मार्षीदुपदेश्य इत्याशयेन तमेव तावत् स्मारयितुमाह

अथ वात्र महादेवि
परिपाट्या समन्ततः ॥ ३४४ ॥

दीक्षाकाले तु संस्काराः
ये कर्तव्याः
क्रमं तेषां निबोध मे ।

कलादीक्षायां कलोपस्थापनपूर्वं ये संस्कारा उक्ताः ते एवेह भुवनोपस्थापनपूर्वं यद्यपि क्रियन्ते तथापि शिष्यहितत्वात् परमेश्वरस्तान् स्मारयति वक्तव्यशेषं च योजयति ॥

Sampath_eBooks

शक्तिं[1] तत्त्वं च भुवनं
योनिं चैव निवेशयेत् ॥३४५॥

संस्कृताग्नौ आदावध्वसंधितदवलोकनतदुपस्थापनतत्सांनिध्यानन्तरं शक्तिमाधाररूपां ततोऽपि भुवनाश्रयं तत्त्वं ततोऽपि भुवनेशसहितं भुवनं निवेशयेत् शोध्यत्वेनाभिसंदधीत। ततोऽपि हृदा वागीशीं सर्वयोनिव्यापिकां न्यसेत् ॥ ३४५ ॥

ततः

तेषां गन्धोपचारं तु[2]
कृत्वा चैव यथाक्रमम् ।

तेषामिति आधारशक्तितत्त्वभुवनादीनाम् ॥

अत्र च शोधनीयानि भुवनेशसहितानि भुवनानि क्रमेण दर्शयति

अनन्तं चैव कालाग्निं
नरकांश्च यथाक्रमम् ॥ ३४६ ॥
पातालानि ततश्चोर्ध्वे
शोधयेदनुपूर्वशः ।

---

१ 'शक्तितत्त्वं' क० । २ 'च' क० ।

Sampath_eBooks

नरकानिति, प्रोक्तप्रघट्टकमध्यादेकतमेन भेदेन शोधने चात्र कलादीक्षोक्तप्रक्रिया भुवनेशश्रावणान्ता सर्वानुसर्तव्या ॥

इयदन्तं संशोध्य

उपस्थानं ततः कुर्याद्-
भुवर्लोकस्य वरानने ॥ ३४७ ॥

'धामादिः प्रणवादिश्च ……………… ।'

इत्यादिना मन्त्रेण पूर्वोक्तेन केवलं कलास्थाने भुवनानामप्रक्षेप्यता उपस्थानं च कलशाद्य-ग्न्यन्ताधिकरणषट्के न्यसनम् ॥ ३४७ ॥

एवं कृत्वा

ततो वागीश्वरी देवी
संपूज्या कुसुमादिभिः ।
ततः पशुस्तु संप्रोक्ष्य-
स्ताड्यो विश्लेष्य एव च ॥३४८॥

अथास्य

छेदनं च तथाकर्षो
ग्रहणं योजनं ततः ।

Sampath_eBooks

गर्भधारित्वजनने
अधिकारं तथैव च ॥ ३४९ ॥
योगं भोगं लयं चैव
ततो योनिविशोधनम् ।

कुर्यात् । सर्वमेतत्प्रागेव व्याख्यातम् ॥
यदुक्तं योनिविशोधनमिति तत्र ता योनीः

चतुर्दश समासेन
कथयाम्यनुपूर्वशः ॥ ३५० ॥
पैशाचं राक्षसं याक्षं
गान्धर्वं त्वैन्द्रमेव च ।
सौम्यं तथा च प्राजेशं
ब्राह्मं चैवाष्टमं विदुः ॥ ३५१ ॥

एतच्चोक्तमेव ॥ ३५१ ॥

संहारक्रमयोगेन
शोधनीयाः शिवाध्वरे ।

संहारक्रमयोगेन इत्यनेन चेदमाह—यत्

Sampath_eBooks

स्थावरादि पश्वन्तं[1] तामसं पञ्चकं संशोध्य मानुष्यं शोधयेत् । ततः पैशाचादि ब्राह्मान्तं देवयोन्यष्टकमित्येष एव च क्रमोऽग्रे स्फुटीभविष्यति ॥

एवं योन्यष्टकमुद्भाव्य योनिषट्कमप्याह

पशुपक्षिमृगाश्चैव
तथान्ये च सरीसृपाः ॥ ३५२ ॥
स्थावरं पञ्चमं चैव
षष्ठं मानुषयोनिकम् ।

तदेतत्

देवयोनिसमायुक्तं
प्रोक्तं संसारमण्डलम् ॥ ३५३ ॥
चतुर्दशविधं चैव

एतच्च

भूर्लोके तु विशोधयेत् ।

---

१ पश्वन्तमित्यनन्तरमीदृशः पाठः क पुस्तके—
'तामसं पञ्चकं शोध्य मानुष्यं शोधयेत्ततः ।
पैशाचादि ब्राह्मान्तं देवयोन्यष्टकमिति ॥'

Sampath_eBooks

भूर्लोके कर्मानुसारेण एतदर्ज्यते, इत्यत्र विभागेनैतत्सर्वं शोधनीयम्, अन्यत्र तु सामान्येनापि इत्याशयः ॥

कस्माच्चैतत् संसारमण्डलमित्याह

आत्मा संसरति ह्यत्र
मायाद्यवनिगोचरे ॥ ३५४ ॥
संसारः प्रोच्यते तस्मा-
त्पर्यटेत्स यतस्ततः ।

संसारश्च

सुखं दुःखं तथा मोहं
भुङ्क्ते चैवाध्वमध्यगः ॥ ३५५ ॥
बन्धत्रयसमायुक्तो
वा[1]माशक्त्या त्वधिष्ठितः ।
ईश्वरेण निमित्तेन
सृष्टिसंहारवर्त्मनि ॥ ३५६ ॥

साक्षान्मन्त्रमहेशादिमुखेन वा ईश्वरेण संसारवमनारूपया स्वया वामा[2]शक्त्याधिष्ठितः

१,२ वामश० क पाठः ।

Sampath_eBooks

परतन्त्रीकृतः, तत एव चाणवादिबन्धत्रयेण समायुक्तः सम्यगाक्रान्तोऽभिभूतः सुखादि-त्रयं भुञ्जानः ॥ ३५६ ॥

पुनः पुनश्चाध्वमध्ये
युज्यते स शुभाशुभैः ।

अतश्च

अध्वमध्ये तु ये पाशा
ज्ञेयाश्चानन्तकोटयः ॥ ३५७ ॥

प्रधानगुणभेदेन
यावच्चानाश्रितं पदम् ।

तदुक्तम्

'समनान्तं वरारोहे पाशजालमनन्तकम् ।'

इति ॥

यतश्चैवम्

तस्मादेवं विजानीयात्

किंच

अध्वा बन्धस्य कारणम् ॥ ३५८ ॥

तद्दियति संसारमण्डले कर्मैव कारणमित्याह

Sampath_eBooks

चतुर्दशविधं यच्च
प्रोक्तं संसारमण्डलम् ।
तस्य भेदा ह्यनन्ताश्च
ये ते
भिद्यन्ते कर्मभेदतः ॥ ३५९ ॥

तदित्थं संसारमण्डलहेतुभूताः
कर्मवल्ल्यो ह्यनन्ताश्च
कर्मेशानादिकारकाः ।

अनादिमायाशक्तिमुषितमहिमा हि अणुः स्वोपभोगाय चेष्टमानोऽनन्ताभिः कर्मसंततिभिर्बद्धः ॥

नचैतदस्यान्यतः क्वचिदायातं, अपि स्वपूर्णमन्यतयैवेत्याह

आत्मना बध्यते ह्यात्मा
बद्धं च तमसामर्थ्यात्
मुञ्चेन्नात्मानमात्मना ॥ ३६० ॥

परमेश्वरानुग्रहं विनेत्यर्थात् । मुञ्चेदात्मानमिति पाठो न संगतः ॥ ३६० ॥

Sampath_eBooks

एतद्दृष्टान्तेन स्फुटयति

कोशकारो यथा कीट
आत्मानं वेष्टयेद्दृढम् ।
नचोद्वेष्टयितुं शक्त
आत्मानं स पुनर्यथा ॥३६१॥
तथा संसारिणः सर्वे
बद्धाः स्वैरेव बन्धनैः ।
न च मोचयितुं शक्ताः
पशवः पाशबन्धनाः ॥ ३६२ ॥
स्वयमेव स्वमात्मानं
यावद्वै नेक्षते शिवः ।

अनुग्रहशक्त्या ॥

यतः

शिवशक्तिनिपातात्तु
मुच्यन्ते पाशबन्धनात् ॥३६३॥
अन्यथा नैव जानन्ति
स्वरूपं यत्सुनिर्मलम् ।

Sampath_eBooks

यत्तत्स्वाभिजनं शुद्ध-
मनौपम्यमनामयम् ॥ ३६४ ॥

सुनिर्मलं परमशिवैकरूपम्, अत एव द्वितीयाभावात् अनौपम्यम्, तथा स्व आत्मैव अभिजनं कारणं यस्य तत् अनन्यकार्यं स्वतन्त्रवस्त्वित्यर्थः । यस्मात् शुद्धं चिदेकघनमतश्च अनामयं मायासंस्पर्शशून्यं, यत्तदिति लोकोत्तरम् ॥ ३६४ ॥

कस्मादेतत्स्वरूपं न जानन्तीत्याह

मोहिता मलमोहेन
बद्धाः कर्मकलादिना ।
निगूढास्तत्र तिष्ठन्ति
काष्ठे वह्निर्यथा तथा ॥ ३६५ ॥

'...............अभिलाषो मलोऽत्र तु ।'

इति यः पूर्वमपूर्णमन्यतात्मा स्वरूपाख्यातिरूपो मल उक्तः स एव मोहोऽज्ञानं तेन मोहिता अङ्गीकृताः [1]अत एव स्वभोगार्जनाय चे-

---

१ 'अत एव' इति प्रभृति 'अस्वतन्त्रीकृताः' इत्यन्तं 'क' पुस्तके न दृश्यते ।

Sampath_eBooks

ष्टमानाः, कर्मणा तदुत्थेन च कलादिना क्षित्यन्तेन च देहाद्यात्मना मायीयेन च मलेन बद्धा अस्वतन्त्रीकृताः, अतश्च तत्रैव पाशबन्धे निगूढा निमग्नप्रोक्तस्वस्वरूपास्तिष्ठन्ति यथा काष्ठेऽन्तरग्निः ॥ ३६५ ॥

स चेत्काष्ठनिगूढः

उद्धृतस्तु यथा वह्नि-
र्मन्थकस्य वशात्स्फुटम् ।
स्वस्वरूपं प्रपश्येत
भास्वरं यत्सुनिर्मलम् ॥३६६॥
अन्येषामपि जन्तूनां
तिमिराक्रान्तचक्षुषाम् ।
प्रकाशयति वस्तूनि
हत्वा वै रश्मिभिस्तमः ॥३६७॥
तथात्मा तु विजानाति
यत्स्वरूपमनादिमत् ।
मन्थकस्य वशाद्देवि
नान्यथा तु कथंचन ॥ ३६८॥

Sampath_eBooks

मन्थकस्य वशादित्युक्तिं विभजति

मन्थकस्त्विह देवेशि
स्वयमेव सदाशिवः ।
आचार्यतनुमास्थाय
सदा चानुग्रहे स्थितः ॥ ३६९ ॥

च एवार्थे ॥ ३६९ ॥

मन्त्रा मन्थनवज्ज्ञेया
अध्वा चात्रारणिर्यथा ।
वागीशी योनिसंस्थाना
धूमो ज्ञेयो मलादिवत् ॥ ३७० ॥
आत्मा वै वह्निवज्ज्ञेयो
बोधकस्तु परः शिवः ।

मन्थानं मथनकारणं[1] वैशाखं तद्वन्मन्त्राः, समनान्तोऽध्वाऽरणिः यदावृत आत्मा वह्निः पूर्वनिर्णीतव्याप्तिदृशा वागीशीयोनौ धूमस्थानीयाख्यातिरूपतुच्छमलापासनं परमशिवेन प्रबोध्यते गुरुमूर्तिस्थसदाशिवभट्टारकप्रयुक्त्या॥

१ 'करणं' कपाठः ।

Sampath_eBooks

अतश्च

उद्बोधितो यथा वह्नि-
निर्मलोऽतीव भास्वरः ॥३७१॥
न भूयः प्रविशेत्काष्ठं[1]
तथात्माध्वन उद्धृतः।
मलकर्मकलाद्यैस्तु
निर्मुक्तो विगतक्लमः ॥ ३७२ ॥
तत्रस्थोऽपि न बध्येत
यतोऽतीव सुनिर्मलः।

मलादिनिर्मोकादेवा संसारतया विगतक्लमः तत्रस्थोऽपि उपनत[2]भोगातिवाहनमात्रप्रयोजनतस्तन्मध्यवर्त्यपि न बध्येत तदहंभावाभिमानवान् न भवति अपितु सुष्ठु निर्मलचिद्घनात्माविष्ट एव सर्वदा ॥

किंच

रसवह्निसमायोगा-
त्ताम्रं कालिकया यथा ॥३७३॥

---

१ 'आवि' क०। २ 'उपरतोभोगः' क०।

Sampath_eBooks

विश्लेषितं तु तत्त्वज्ञै-
हेमत्वं प्रतिपद्यते ।
न भूयस्ताम्रतां याति
तथात्मा न कदाचन ॥ ३७४ ॥

अख्यातिरूपया कालिकया गुरुणा वियोजित आत्मा न पुनर्युज्यत इत्यर्थः ॥ ३७४ ॥

अत्र च

रसवन्मन्त्रशक्तिस्तु
क्रिया ज्ञेया तु वह्निवत् ।
तज्ज्ञश्चैव शिवो ज्ञेय
आचार्यतनुविग्रहः ॥ ३७५ ॥
आत्मा वै हेमवज्ज्ञेयो
मलो ज्ञेयस्तु कालिका ।

क्रिया दीक्षा, तज्ज्ञो रसवह्नियोजनावज्ज्ञानयोगक्रियामयदीक्षासतत्त्ववित् ॥ ३७५ ॥

अतश्च

मन्त्रद्रव्यक्रियायोगा-
द्वह्न्याधारे तथा प्रिये ॥३७६॥

Sampath_eBooks

गुरुणा तन्त्रविदुषा
ह्यात्मा वै निर्मलीकृतः।
न भूयो मलतां याति
शिवत्वं याति निर्मलम् ॥३७७॥

तथेति, चतुर्थपटलोक्तप्रक्रियायोजनिकाक्रमेण। तन्त्रविदुषेति, तन्त्रज्ञानमत्र पर उपाय इति शिक्षयति। उक्तं हि

'नचावज्ञा क्रियाकाले संसारोद्धरणं प्रति।
मन्त्रदानव्रतादेशे शिष्यध्रुङ् नरकी भवेत् ॥'

इति। मलतामिति, अपूर्णमन्यतारूपामख्यातिं, शिवत्वं परशिवैक्यम् ॥ ३७७ ॥

उपसंहरति

एवं ज्ञात्वा वरारोहे
दीक्षा कार्या यथा पुरा।

चतुर्थपटलोक्तक्रमेण। वक्ष्यति हि

'नास्ति दीक्षासमो मोक्षः…………।'

इति ॥

Sampath_eBooks

तत्र च दीक्षायाम्

शोधयेन्मुख्यपाशांश्च
ये प्रोक्तास्ते मया पुरा ॥३७८॥

'मलकर्म निमित्तं तु नैमित्तिकमतः परम् ।'

इति तन्त्रान्तरे ॥ ३७८ ॥

अतश्च

गुणभूतास्तु ये पाशा-
स्तेऽपि शुध्यन्ति तद्वशात् ।

गुणभूताः मद[1]मोहादयः, तद्वशादिति आ-णव[2]कार्ममायीयशुद्धिवशात् ॥

किंतु गुणभूतमपीदम्

चतुर्दशविधं चैव
यदुक्तं तु मया पुरा ॥ ३७९ ॥
संसारमण्डलं देवि
शोध्यं तदवनीतले ।

शोध्यमिति पृथगेवेत्यर्थः ॥

---

१ 'महामो' क. । २ 'वमायीय' क.

Sampath_eBooks

अतश्च

तद्वक्ष्यामि क्रमात्सर्वं
यथा शोध्यं शिवाध्वरे ॥३८०॥

अदूर एव ॥ ३८० ॥

यच्च

ब्रह्मादिस्तम्भपर्यन्तं
प्राधान्येन विशोधयेत् ।

नत्वन्तर्भावेनेत्युक्तम् ॥

तत् क्रमेण तावदुद्दिशति

ब्राह्मं चैव तु प्राजेशं
सौम्यमैन्द्रं तथैव च ॥ ३८१ ॥
गान्धर्वं चापरं याक्षं
राक्षसं च तथापरम् ।
पैशाचं क्रमतः शोध्यं
स्थावरं मानुषं तथा ॥ ३८२ ॥

स्थावरं पञ्चविधं तिर्यग्योन्युपलक्षणम्[1] । क्रमत इति संहारक्रमेण ॥ ३८२ ॥

---

१ 'तैर्यग्योनो' क.

Sampath_eBooks

यदुक्तं

'संहारक्रमयोगेन ते च शोध्याः············।'

इति संहारक्रमेण शोधनं तत्तत्स्थावरादिजातीयमध्यगतप्रधानभूतैकैकक्रमेण प्रस्तावयति

सप्तच्छदं स्थावराणां
सर्पाणां वासुकिं तथा ।
पक्षिणां गरुडं चैव
मृगाणां सिंहमेव च ॥ ३८३ ॥
पशूनां चैव गोयोनिं

अत्र च देवदत्तात्मने प्राक्कर्मार्जितस्थावरादिजातिप्रधानभूतं सप्तच्छदं शोधयामि स्वाहा इत्याद्यूहः कार्यः ॥

एवं तैर्यग्योनं पञ्चप्रकारं प्रातिलोम्येन संशोध्य

मनुष्यांश्च विशोधयेत् ।

तानपि प्रातिलोम्येन ॥

अन्त्यजाञ् छूद्रविट्क्षत्र-
ब्राह्मणांश्च विशोधयेत् ॥३८४॥

Sampath_eBooks

तदेतासु सर्वासु जातिषु
पञ्चभिर्ब्रह्मभिर्द्वि
त्वधिकारान्विशोधयेत् ।

अधिकारान् प्राक्कर्मवशसंभाव्यमानतत्तज्जातिसंबन्धात् ॥

कथं

दशाहुतिप्रयोगेण
अन्त्यजान् ब्राह्मणावधि ॥३८५॥

'तिस्रः पञ्चदशैका वा·················।'

इति प्रागुक्तेरिहायमपवादः । तत्र स्थावरादिपश्वन्ते पञ्चके अन्त्यजादिब्राह्मणान्ते च पञ्चके प्रातिलोम्येन सद्योजातादय ईशानान्ताः प्रणवपूर्वका मन्त्रा मन्तव्याः[2] ॥ ३८५ ॥

ब्राह्मणस्य षट्कर्माधिकारित्वात् तत्तच्छुद्धौ विशेषमाह

ब्राह्मणस्याधिकाराष्टौ
चत्वारिंशतमेव च ।

विशोधयेदित्येव ॥

१ 'ब्रह्मभिर्ब्रे' क. २ 'ज्ञातव्याः'. क.

Sampath_eBooks

तान् क्रमेणाह

गर्भः पुंसवनं चैव
सीमन्तो जातकर्म च ॥३८६॥
नाम निष्क्रमणं चैव
अन्नप्राशनचूडकम् ।
अनेनैव वरारोहे
शोध्यास्त्वष्टौ प्रकीर्तिताः ३८७

सीमन्तोऽङ्गोपाङ्गविभागसंपत्तिः, निष्क्रमणमादित्यदर्शनं, चूडकं शिखाक्लृप्तिः । अनेनैवेति, प्रोक्तक्रमायातविनियोगेनेशानभट्टारककारणकेन दशाहुतिप्रयोगेण ॥ ३८७ ॥

अतश्च

एतैर्निवर्तितैर्देवि
ततोऽसौ जायते द्विजः ।

अविप्लुताभ्यां ब्राह्मणाभ्यामेकं वैदिकैर्मन्त्रैः संस्कारैश्च द्वितीयं जन्म द्विजस्य यत्सिद्धं तदुभयमपीहत्यैरेव मन्त्रैः कृतमिति ॥

Sampath_eBooks

एवमस्य द्विजस्य

नवमो व्रतबन्धस्तु

संस्कारः।

स चाङ्गी परिकीर्तितः ॥३८८॥

यतस्तेनास्य

अङ्गानि संप्रवक्ष्यामि

यथावदनुपूर्वशः।

तान्याह

मेखला दन्तकाष्ठं च

अजिनं त्र्यायुषं तथा ॥३८९॥

संध्यां वह्नेरुपासां च

भिक्षां वै सप्तमं विदुः।

त्र्यायुषं भस्मत्रिपुण्ड्रकम्। एतानि च मेखलाव्रतानि सप्त, एतानि ब्रह्मचारी समाचरेत्॥

नियन्तॄणि च दृष्टानि

दीक्षाकाले वरानने ॥ ३९० ॥

दीक्षाकाले मण्डलोपलक्षितभाविगोदानसमयेऽनिष्पन्नानि सन्त्येतानि नियन्तॄणि प्र-

Sampath_eBooks

थमाश्रमावस्थितेर्लोपो मा भूदित्यवश्यानुष्ठेयानि ॥ ३९० ॥

किंच

भौतेशं पाशुपत्यं च
गाणं गाणेश्वरं तथा ।
उन्मत्तकासिधारं च
घृतेशं सप्तमं विदुः ॥ ३९१ ॥
सप्तैतानि तु दृष्टानि
व्रतानि ब्रह्मचारिणाम् ।

दृष्टानीति पारमेश्वरे शास्त्रे, वेदे तु उच्छिन्नशाखापक्षे स्थितानि अद्यत्वेऽननुष्ठेयत्वात् ॥

एतानि च

चर्याव्रतानि बोध्यानि

व्रतसंधावसरे चरणीयानि ।

एतानि च

अङ्गत्वे कीर्तितानि तु ॥३९२॥

फलेन फलवतो[2] व्रतबन्धाख्यस्य संस्कारस्यैतानि अङ्गभूतानि व्रतान्तराणि ॥ ३९२ ॥

---

१ 'तच्छिन्न' क. पाठः. २ 'फलतः' ख.

Sampath_eBooks

अतश्च

एभिस्तु सहितं ह्येकं
नवमं व्रतबन्धनम् ।
तस्यान्तर्भूतमेवैतत्
कथितं व्रतसप्तकम् ॥ ३९३ ॥

तदेवं मेखलादीनि सप्त, भौतेशादीनि च सप्तेति कृत्वा

चतुर्दश व्रतान्येवं
होतव्यानि वरानने ।

पृथक् पृथक् नतु व्रतबन्धान्तर्भावमात्रेणेत्याशयः ॥

अथ

वेदव्रतानि चत्वारि
होतव्यानि न संशयः ॥३९४॥

होमेन संपाद्यानि ॥ ३९४ ॥

तान्याह

ऐष्टिकं पार्विकं चैव
भौतिकं सौमिकं तथा ।

Sampath_eBooks

इष्टिपर्वभूतसोमयज्ञप्रतिपादकवैदिकग्रन्थपाठेन कालकार्याणि व्रतानि ऐष्टिकादिशब्दैः पारमेश्वरेषु ग्रन्थेषु उक्तानि । यज्ञसूत्रे तु

'त्रैविद्यं च चतुर्होत्रं गोदानं स्नानमित्यपि ।
वेदव्रतानि चत्वारि·····················॥'

इत्येवमुक्तानि । इह तु गोदानं पृथगेव भविष्यति ॥

एते च वेदाध्ययनाधिकारदानेन व्रतान्तरापेक्षया प्राधान्यात्

व्रतेश्वरास्तु चत्वारो
ब्रह्मचारिनियामकाः ॥ ३९५ ॥

ब्रह्मचारिणां नियामकास्तथात्वसंपादकाः ॥ ३९५ ॥

तदेतावत्पर्यन्तमेतान् संस्कारान्

त्रयोदश विजानीयात्

एभिरनुष्ठितश्चायं वेदेष्वधिकृत इत्याह

ततो वै वेदभाजनम् ।

किंच

ततो भवति गोदानं
तच्चतुर्दशकं प्रिये ॥ ३९६ ॥

Sampath_eBooks

वेदाध्ययनान्ते उपाध्यायाय गोमिथुनदानेनोपलक्षितमात्मनः केशादिवपनं गोदानम् ॥ ३९६ ॥

अथ गुरुभिर्गार्हस्थ्यायानुज्ञातः

स्नात उद्वाहयेद्भार्यां
ज्ञानसिद्धः कुमारिकाम् ।

वेदाध्ययनेन लब्धशुद्धिः स्नात उच्यते । अध्ययनान्ते हि स्नानमनेनैवाशयेनाम्नातम्, अत एवायं वेदार्थाधिगमात्मना ज्ञानेन सिद्धः संपूर्णः ॥

अथ वा 'ब्रह्मचर्यादेव प्रव्रजेत्' इति चोदितत्वात् शीघ्रमेव प्राव्राज्यमिच्छन्

कृत्वा दर्भमयीं पत्नीं
तया सह यजेत्क्रतून् ॥३९७॥

गृहस्थाश्रमचोदितनित्यनैमित्तिकरूपमित्थमुद्वाहात्मकसंस्कारसंपादनरूपमेतत् कर्म

तज्ज्ञेयं पञ्चदशमं

अनेनैव च

'पितृदेवमनुष्याणां भूतानां तर्पणं तथा ।
ब्रह्मणोऽध्ययनं चेति महायज्ञास्तु पञ्च वै ॥'

Sampath_eBooks

इति यज्ञसूत्रप्रतिपादिता नित्ययज्ञाः संगृहीताः । तदुक्तम्

'पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
खण्डनी चोदकुम्भश्च बध्यते यस्तु वाहयन् ॥
तासां क्रमेण सर्वासां निष्कृत्यर्थं महात्मभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥'

इत्येवमुद्वाहेनैवैते नित्ययज्ञाः संगृहीता इत्याशयः ॥

नैमित्तिकानाह

ततः पाकमखाः क्रमात् ।
नैमित्तिकांश्च तानाहुः
प्रवक्ष्याम्यनुपूर्वशः ॥ ३९८ ॥
अष्टकाः पार्वणी श्राद्धं
श्रावण्याग्रायणी तथा ।
चैत्री चाश्वयुजी चेति
सप्त पाकमखाः क्रमात् ॥३९९॥

पौषादिकृष्णपक्षगताः शाकाद्या अष्टकाः ।

Sampath_eBooks

पार्वणी सितासितपक्षाद्यदिने, तत्रत्यो यागस्तथोक्तः। श्राद्धं पित्र्यादिदिनोक्तो विधिः । श्रावण्यां यागः श्रावणी । आग्रायणी नवान्नयागः । एवं चैत्र्यादिरपि बोद्धव्यः । अन्ये तु आग्रायणीद्वयमिति पठित्वा शरद्वसन्तयोर्नवान्नयागद्वयं व्याचक्षते, ते च पार्वणं श्राद्धमेकमेव वर्णयन्ति । एते च पाकयज्ञा वेदे तु पुरोडाशादिभिः कार्या उक्ताः, वक्ष्यमाणास्तु हविर्यज्ञाः सक्त्वादिभिः । इह तु विशेषानभिधानात् प्रस्तुतैस्तिलैरेव कार्या इति ज्ञेयम् ॥३९९॥

तदेवम्

एतैः सह विजानीया-
द्द्वाविंशत्परिसंख्यया ।

एतैः सप्तभिः सह पूर्वोक्तान् पञ्चदश संस्कारान् ।

अथ

आग्नेयं चाग्निहोत्रं च
दर्शं चैव ततः परम् ॥४००॥

---

१ 'पैत्र्यादि' क. पाठः ।

Sampath_eBooks

पौर्णमासी तथा ज्ञेया
चातुर्मास्यं तथैव च।
पशुबन्धः समुद्दिष्टः
सौत्रामणिरतः परम् ॥ ४०१॥
हविर्यज्ञाः समाख्याताः
सप्तैते पावनाः प्रिये।

आग्नेयमरणिक्रमेण अग्न्यानयनम् । अग्निहोत्रं सायंप्रातश्च होमः। दर्शो विपरीतलक्षणयाऽदृश्यमानचन्द्र आमावस्यो यागः। चातुर्मास्यं फाल्गुनात् चैत्राद्वा प्रभृति मासचतुष्टयान्ते पौर्णमासीभवो विशिष्टो यागः। पौर्णमासीशब्देन तु सर्वपौर्णमासीगतः सामान्ययाग उक्तः। पशुबन्धो यागविशेषो यत्र पशोर्मांसवसादि हूयते। सौत्रामणिः सुत्रामदेवताकः सुरायागः ॥

एतानपि संकलयति

एभिः सह विजानीया-
त्संस्कारैकोनत्रिंशकम् ॥४०२॥

Sampath_eBooks

अथ

अग्निष्टोमात्यग्निष्टोमौ
उक्थ्यः षोडशिका तथा।
वाजपेयोऽतिरात्रस्तु
आ[1]प्तोर्यामस्तु सप्तमः ॥४०३॥

त एते यागविशेषाः
सोमसंस्थाः समाख्याताः

ग्रह[2]करणकसो[3]मपानयुक्ता यज्ञरूपाः क्रियाः सोमसंस्थाः ॥

एतावदन्तानेतान् संस्कारान्
षट्त्रिंशत्परिसंख्यया।

प्रोक्तमन्त्राहुतिक्रमेण कुर्यादिति शेषः।

अथ

हिरण्यपादः प्रथम-
स्तथा गुह्यहिरण्यधृत् ॥४०४॥
हिरण्यमेढ्रो हिरण्यनाभि-
र्हिरण्यगर्भ एव च।

---

१ 'आप्तर्याम' क पाठः। २ 'ग्रहण' क०,। ३ 'महोम' क पाठः।

Sampath_eBooks

हिरण्यश्रोत्रो हिरण्यत्व-
ग्घिरण्याक्षस्तथैव च ॥४०५॥
हिरण्यजिह्वस्तच्छृङ्गो
दश यज्ञाः प्रकीर्तिताः ।

गर्भो हृदयम् । एते पक्ष्याद्याकारा अग्निचित्याविशेषा येषां पादादिस्थानेषु हिरण्यं दीयते ॥

येषां तत्तत्पक्ष्याद्याकृतिभेदात्

शतेन तु घृतं चात्र
एकैकं तु विजायते[1] ॥४०६॥

एतत्संपत्त्यर्थं होमे विशेषमाह

एते सर्वे सहस्रेण
शुद्ध्यन्ते

स एव सहस्रहोमसंपाद्यो हिरण्यपादादिश्चित्ययज्ञः ।

सप्तत्रिंशकः ।

किंच

अश्वमेधं ततः पश्चा-
ज्जुहुयात्तु यथाक्रमम् ॥४०७॥

---

१ 'विजानते' क. ।

Sampath_eBooks

ब्राह्मणस्यापि कर्मवशप्राप्तसार्वभौमभूपतित्वस्य अयमश्वमेधः कार्य एव ॥ ४०७ ॥

एवं विवाहात् प्रभृति एतावदन्तैः

एवं कृतैस्तु तैः सर्वै-
स्ततश्चैव गृही भवेत्।

द्वितीयाश्रमस्थः ॥

अष्टात्रिंशत्तमं तं तु

अश्वमेधाख्यं संस्कारं जानीयादित्यर्थः।

वानप्रस्थं ततो भवेत् ॥४०८॥

पारिव्राज्यं ततोऽन्तेष्टि-
मेवं ब्राह्मण्यमाप्नुयात्।

वानप्रस्थं पारिव्राज्यं चाश्रमद्वयरूपं संस्कारद्वयम्। अन्तेष्टिर्विहितानुष्ठानसंभाव्यमानप्रायश्चित्तशुद्ध्यर्थं गार्हस्थ्यावस्थितस्य कार्या न तु वानप्रस्थस्याश्रितपारिव्राज्यस्य वा तेनासौ पृथङ् न गण्यते। एवमिति पारमेश्वरमन्त्रहोमक्रमेण, पाशवे तु विधौ सत्यपि बीजाहारादिदोषसद्भावात् न सम्यग्ब्राह्मण्यं भवति।

Sampath_eBooks

इदं तु पारिव्राज्यलक्षणं चत्वारिंशत्तमसंस्कारमेतैः सह विजानते, एतैः सह गणितमिति यावत् ॥

अत आत्मगुणानष्टौ
कथयामि समासतः ॥४०९॥
दया सर्वेषु भूतेषु
क्षान्तिश्चाप्यनसूयता ।
शौचं चैवमनायासो
मङ्गलं चाप्यतः परम् ॥४१०॥
अकार्पण्यं चास्पृहा चे-
त्यष्टावात्मगुणाः स्मृताः ।

दया परानुकम्पा, क्षान्तिरपकारिषु शक्तत्वेप्यप्रतिक्रिया, परगुणसहत्वमनसूयता, चित्तवाक्शरीरशुद्धिः शौचम्, अक्लेशावहकर्मकारित्वमनायासः, मङ्गल्यद्रव्याणां दर्शनस्पर्शनचिन्तनानि मङ्गलं, यथाशक्ति दातृत्वमकार्पण्यम्, अस्पृहा संतोषः, इत्येते आत्मन आत्मसंनिकृष्टस्यान्तःकरणवागादेर्गुणा न तु

Sampath_eBooks

आत्मनस्तस्य चिदेकरूपत्वात् । तत्र च दीक्ष्यात्मनो ब्राह्मण्याय गर्भाधानं करोमि स्वाहा, इत्यनेन सप्रणवेशानोच्चारपूर्वेण मन्त्रेणादौ पञ्चकृत्वो हुत्वा पुनर्गर्भाधानं संपन्नमस्तु, इत्यन्तेन पञ्चकृत्वो जुहुयात् । इत्थमेव चत्वारिंशदन्तान् संस्कारान् निधाय वक्ष्यमाणमन्त्रक्रमेण गुणाष्टकोत्थापनपूर्वं ब्राह्मण्यमस्यापाद्य ईशानेनैवाधिकारभोगादिपूर्वं ब्राह्मण्यमस्य शोध्यम् ॥

इत्थमेव

चत्वारिंशदथाष्टौ तु
संस्काराश्च समासतः ॥४११॥
एतैः शुद्धैस्तु शुद्ध्यन्ति
असंख्या येऽपि सुव्रते ।

चत्वारिंशद्देहविषयाः, अष्टौ तु पुर्यष्टकनिष्ठाः । असंख्या इति आचाराध्यायोक्तविविधाचाररूपाः ॥

यत एते आत्मगुणाश्चत्वारिंशद्देहसंस्कारानन्तरमुक्ताः

Sampath_eBooks

अतोऽन्[1]तेष्टिं तु हुत्वा वै
गुणानापादयेच्छिशोः ॥४१२॥

अत्रापि ब्राह्मण्यशुद्धौ सामान्योक्त्येशानमन्त्रस्य विनियोगे प्राप्ते विश्लेषमाह

पञ्च पञ्चाहुतीर्हुत्वा
ब्रह्मभिश्चाप्यनुक्रमात् ।

चशब्द एवार्थे, ब्रह्मभिरेव, अपिशब्दात्समुचितोहर्युक्तैः । अनुक्रमशब्दस्यायमर्थः—प्राग[2]ुक्तक्रमेण सद्यआदिचतुष्टयेन दयाक्षान्त्यनसूयाशौचाख्यं चतुष्टयं प्रोक्तयुक्त्या पञ्चधा पञ्चधा हुत्वा, ईशानेनानायासमङ्गलाकार्पण्यास्पृहाख्यं चतुष्टयं तथैवाहुतिभिः संपादयेदिति॥

आहुतिषु करणमाह

तिलैर्घृतेन वा तांश्च

दत्त्वेति संबन्धः । तिलाः स्नेहमयबीजात्मकाः, आज्यं [3]मूर्तः स्नेह इति । संस्कारबीजानां

---

१ 'न्त्येष्टिं' क० । २ 'प्राप्त' क पाठः । ३ 'मूर्तेः' ख पाठः ।

Sampath_eBooks

संस्काराभिलाषस्नेहस्य चैतत्प्र[ति]कृतिरूपं वासनास्नेहदाहात्मके दीक्षाकर्मणि होतव्यम् ॥

एवं कृत्वा

ऊर्ध्वे तु विनियोजयेत् ॥४१३॥

किमूर्ध्वमित्याह

ऊर्ध्वशब्देन चाशुद्धं
यत्कर्म परिकीर्तितम् ।

मनुष्यजातिप्रदस्य कर्मणो भूर्लोके शोधितत्वात् तदुपरिवर्तिदेवयोनिप्रदं कर्म यत्तदूर्ध्वमुच्यते ॥

तच्छुद्धये च दीक्ष्यस्य

तस्मिन् संयोजनं कार्यं

न तु तं त्यक्त्वान्यत्रेत्याह

नचान्यत्र विधीयते ॥ ४१४ ॥

एतत्स्फुटयति

तस्मान्नोद्धरणं कार्यं
न चापि नयनं क्वचित् ।

Sampath_eBooks

यत्तत्र परिपाट्या तु
कर्म तत्र नियोजयेत् ॥४१५॥

उद्धरणमुल्लङ्घनं, नयनमस्य स्थानेऽन्यस्य शोधनं नियोजयेत् इति दीक्ष्यम् ॥ ४१५ ॥

एवं स्थावरादिक्रमेण मनुष्यजातिभेदान् संशोध्य देवयोनीः शोधयितुमाह

ततोऽणिमादिरापाद्यो
ब्रह्मभिश्चाप्यनुक्रमात् ।
पञ्चाहुतिप्रयोगेण
भोगार्थं चैवमात्मनः ॥४१६॥

प्राग्वत्संहारक्रमेण प्रणवसद्योजातोच्चारपूर्वं देवदत्तस्य पैशाचाणिमादिमापादयामि स्वाहेत्याहुतीः पञ्च हुत्वा तद्भोगप्राप्तिमस्य संचिन्त्य तेनैव मन्त्रेण पैशाचभोगमस्य शोधयामि स्वाहेति पञ्चाहुतीर्दद्यात् । अनेन क्रमेण वामदेवाघोरतत्पुरुषैः राक्षसयाक्षगान्धर्वान् संशोध्य ऐन्द्रादिब्रह्मान्तचतुष्टयं सत्त्वप्रधानमीशानभट्टारकेणैव शोधयेत् ॥ ४१६ ॥

Sampath_eBooks

नच मानुष्यादनन्तरं देवयोनीरूर्ध्वस्थाः 'शोध्याः' इति मत्वा बुद्धितत्त्ववर्तिनीस्ताः शोधयेत्, अपितु

ऊर्ध्वशब्देन तज्ज्ञेयं
यद्भूर्लोकं समाश्रितम् ।
तस्मिन्युक्तस्य कर्तव्यं
नचान्यस्मिन्कदाचन ॥ ४१७ ॥

भूर्लोकमाश्रितं भूर्लोके देवयोन्युपपत्तिदं यत्कर्म, तदत्रोर्ध्वं ज्ञातव्यम् । तत्र युक्तस्य भोगार्थं योजितस्य मन्त्रैः कर्तव्यं शोधनमित्यर्थात्, नतु बुद्धितत्त्वे तत्र सुनन्दकरालादिनामविशेषोच्चारणेन शोधनस्य वक्ष्यमाणत्वात् ॥ ४१७ ॥

युक्तं चैतत्, अन्यथा क्रमप्राप्तात् शोध्यस्थानात् दीक्ष्यात्मनि

अनुद्धृते कथं योगः
नच ततस्तावदुद्धरणं युज्यते
यावत् कर्म न भुज्यते ।

दीक्ष्येण दीक्षाप्रभावादिति शेषः ॥

यतश्चायं कर्मफलमवश्यं भोजयितव्यः,

Sampath_eBooks

ततो योजनमस्य तत्तत्कर्मवासनैकताननतामय-
माचार्येण भावनया क्रियत इत्याह

तस्मात्तु योगशब्देन
तत्तत्कर्मैकचिन्तना[1] ॥४१८॥
निर्वर्त्यते[2] महादेवि

अथ

निष्कृतिं जुहुयात्ततः ।
शिवेनाष्टशताहुत्या

शिवेनेति निष्कलेन । एतच्चतुर्थपटल एव
निर्णीतं तथा वक्ष्यमाणमपि ॥

यदाह

ततस्तु भुवनाधिपान् ॥४१९॥
भुवनान्तर्निवासांश्च
भुवनानां यथाक्रमम् ।
होमेनैव तु संशोध्य
विश्लेषं छेदनं तथा ॥ ४२० ॥
पूर्णां चैव समुद्धारं
तत्स्थत्वं चाप्यनुक्रमात् ।

कुर्यादिति शेषः । भुवनानां शोधने प्रस्तुते

---

१ चित्तता क. पाठः । २ निर्वर्त्यते क. पाठः ।

Sampath_eBooks

भुवनेशान् कालाग्न्यादीन् प्रधानभूतान् भुवनान्तर्वासिनश्च अन्यानपि तदङ्गभूतानाहूय आहुतिभिः स्मर्तव्यश्रावणादिपूर्वं विसर्जयेदिति । तेषां शोधनं कृत्वा भुक्तेभ्यो भोगेभ्यो दीक्ष्यस्य विश्लेषो वियोजनं, छेदनं तु सूत्रस्य भुवनात्मनः पाशस्य, समुद्धारं ततो भुवनात्, तत्स्थत्वं शिष्यहृन्निवेशमित्यादि पूर्वमेव निर्णीतम् । यथाक्रममिति वदन्नुद्धारादनन्तरमात्मस्थीकरणं, ततस्तत्स्थीकरणं, ततो भुवनेशाह्वानमिति प्रागुक्तमेव क्रमं स्मारयति भूर्लोकेशाधिपतिर्भगवान् शर्व इत्यग्रे भविष्यति ॥

किंच

प्रायश्चित्तं ततो हुत्वा
न्यूनाधिकनिमित्ततः ॥४२१॥

उत्तरं कर्म कार्यमिति शेषः ॥ ४२१ ॥

एतत्सर्वं भूर्लोकोक्तं भुवनान्तरशुद्धावप्यतिदिशति

एवमादिक्रमेणैव
धामान्तं च विशोधयेत् ।

Sampath_eBooks

धाम समनावधिकशिवतत्त्वरूपं तदन्तम्। यदुक्तं

'समनान्तं वरारोहे पाशजालमनन्तकम् ।' (स्व० ४।४१०)

इति। एवमादिक्रमेणेति, प्रोक्षणादिपूर्वं शिष्यात्मनस्तत्र प्रागुक्तसंस्कारान्तरोपस्कृतान् जन्माधिकारभोग[1]लयनिष्कृतिविश्लेषपाशच्छेदपूर्णाहुत्युच्चारात्मस्थतत्स्थत्वसंस्कारान् कृत्वा भुवनेशाह्वानतर्पण[2]श्रावणाविसर्जनादियुक्त्येत्यर्थः ॥

तदेतत् प्रासङ्गिकमुक्त्वा प्रकृतमनुबध्नाति

भूर्लोकस्तु समाख्यातो
भुवो[3]र्लोकं निबोध मे ॥४२२॥
भूपृष्ठाद्यावदादित्यं
लक्षमेकं प्रमाणतः ।

तत्र च

दश वायुपथा मध्ये
त्वयुतायुतसंख्यया ॥ ४२३ ॥

अयुतं दश सहस्राणि, अयुतायुतमन्तर-

---

१ भोगाल० क पाठः । २ तर्पणाश्रव० क पाठः । ३ भुवर्लोकं क पाठः ।

Sampath_eBooks

मिति पाठे तेषामयुतायुतमन्तर्निवासस्थान- मिति व्याख्येयम् ॥ ४२३ ॥

तत्र

आद्ये वायुपथे मेघा-
न्कथयामि यथास्थितान् ।

परमेश्वरेच्छानियमितवायुविततविहरणो- पभोगभूमयो वायुपथाः ॥

तत्र

पञ्चाशद्योजनादूर्ध्व-
मृतर्द्धिर्नाम मारुतः ॥ ४२४ ॥
यो विवर्धयते पुष्टि-
मोषधीनां बलं तथा ।
बृंहयेच्च महीं सर्वा-
माप्याययति चाव्ययः ॥४२५॥

अव्यय इति सदा आप्यायादि कुर्वन्नपि न क्षीयते ॥ ४२५ ॥

किंच

दिवा हंसः स वै वायु-
र्मनुजानां सुखावहः ।

Sampath_eBooks

स एव

यतो गृद्धान्धारयति
तेन गृद्धधरः स्मृतः ॥ ४२६ ॥

एक एवायं नानासंज्ञो नानाव्यापारश्चेत्यर्थः ॥ ४२६ ॥

तदुपरि

प्राचेतसो नाम वायुः
प्रचेतोभिविनिर्मितः ।
स वै नाशयते वृक्षान्
कदाचित्संप्रवर्तयेत् ॥ ४२७ ॥

प्रचेतसा वरुणेनाभिविनिर्मितः उत्पादितः । नाशयते दहति । प्रवर्तयति उद्भिन्नाङ्कुरान् संपादयति ॥ ४२७ ॥

वायोः कथं दाहकत्वमित्याह

अग्निः प्राचेतसो नाम
तेनैव सह तिष्ठति ।

तत्साहित्यादसौ

यदा दहति वेश्मानि
तदासौ समुदाहृतः ॥ ४२८ ॥

Sampath_eBooks

एतन्नामैवेत्यर्थः ॥ ४२८ ॥

अयं चाग्निर्वडवात्मेत्याह

सुखी समुद्रे वसति

अयत्नोपनतनानानीरपानाशनः ॥

वसंश्चात्र

स जलान्नोपशाम्यति ।

प्रत्युत ज्वलति ॥

अथ

योजनानां शतादूर्ध्वं

सेनानीर्वायुरुच्यते ॥ ४२९ ॥

'नीचवायुरिति स्मृतः' इति केचित्पठन्ति । शतादूर्ध्वमित्यत्रायमाशयः—भूपृष्ठात्पञ्चाशद्योजनोर्ध्वं योजनपञ्चाशति ऋतर्द्धिः, प्रचेताश्च पञ्चाशति ॥ ४२९ ॥

विद्युद्दन्तो मूकमेघा

वसन्त्यस्मिंश्च मारुते ।

चो ह्यर्थे ॥

१ शादिति क पाठः ।

Sampath_eBooks

ते भुवः क्रोशमात्रेण
तिष्ठन्तोऽपसृजन्त्यपः ॥ ४३०॥
योजनानां शतादूर्ध्वं
मेघाः सत्त्ववहाः स्मृताः ।
मत्स्यमण्डूककूर्मांश्च
वर्षन्त्येते च दुर्दिने ॥ ४३१ ॥

यत ईदृशास्ततः सत्त्ववहा इत्यर्थः ॥ ४३१ ॥

एतस्मात् सत्त्ववहव्यापात्

योजनानां शतादूर्ध्वं[1]
वायुरोघः[2] प्रकीर्तितः ।
तस्मिंस्तु रोगदा मेघा
वर्षन्ति च विषोदकम् ॥४३२॥
तेनोपसर्गा जायन्ते

चो ह्यर्थे ॥

तैश्चोपसर्गैः पीडादिभिः

मारकाः सर्वदेहिनाम् ।

प्रवर्तन्ते ॥

---

१ 'पञ्चाशद्योजनादूर्ध्वं' पुस्तकान्तरे दृष्टः पाठः । २ रोगः ख पाठः ।

Sampath_eBooks

अथ

तस्मादूर्ध्वं तु तावद्भ्यो
देव्यमोघः स्थितो मरुत् ॥४३३॥
तस्मिंस्ते मारका मेघा
अमोघे[1] संप्रतिष्ठिताः ।

तावद्भ्यः पञ्चाशत इत्यर्थः । तावच्छब्दो व्यवहितपञ्चाशद्योजनामर्शकः ॥

अथ

वज्राङ्गो नाम वै वायुः
पञ्चाशद्योजनस्थितः ॥ ४३४ ॥
तस्मिंस्तूपलका नाम
मेघास्तूपलवर्षिणः ।

तदुपरि

तावद्भिर्योजनैरेव
ततो वै वैद्युतोऽनिलः ॥४३५॥
मेघाश्च वैद्युतास्तस्मिं-
न्निवसन्ति तु वैद्युते ।

---

१ अमेघे ख पाठः । २ अनलः क पाठः ।

Sampath_eBooks

तावद्भिः पञ्चाशता ॥
वैद्युतत्वमेतेषां विद्युत्कारणत्वेनेत्याह

अशनिर्वायुसंक्षोभा-
त्तेष्वसौ जायते महान् ॥४३६॥

अशनिर्विद्युत् । तेषु मेघेषु ॥ ४३६ ॥

तदूर्ध्वं योजनानां च
पञ्चाशद्रैवतः स्मृतः ।
तस्मिन्पुष्टिवहो नाम
पुष्टिं वर्षति देहिनाम् ॥४३७॥

रैवत इति तदाख्यः।पुष्टिवहाख्यो मेघः ४३७

तदुपरि स्थिते

संवर्ते रोगदा मेघा-
स्ते रोगोदकवर्षिणः ।
पञ्चाशद्योजने ते वै
तस्मिंस्तिष्ठन्ति तोयदाः ॥४३८॥

ततोऽपि

विषावर्तो नाम वायुः
पञ्चाशदुपरि स्थितः ।

Sampath_eBooks

तस्मिन्क्रोधोदका नाम
मेघा वै संप्रतिष्ठिताः ॥ ४३९ ॥
ते क्रोधरागबहुलं
संग्रामबहुलं तथा ।
राज्ञां क्षयकरं चैव
प्रजानां क्षयदं तथा ॥ ४४० ॥
वर्षं चैवात्र कुर्वन्ति
यदा वर्षन्ति ते घनाः ।

ते घनाः संवर्ताश्रयस्य पञ्चाशत उपरि पञ्चाशदुपरि । विषावर्तस्य तु मानमग्रे वक्ष्यति । क्रोधसहितो रागः क्रोधरागस्तेन बहुलं पूर्णं तत्संपादकमिति यावत् ॥

ओघादीन् सप्त वायून् धर्मसाम्येन विशिनष्टि

ओघोप्यमेघो[1] वज्राङ्गो
वैद्युतो रैवतस्तथा ॥ ४४१ ॥
संवर्तश्च विषावर्तो
वायवो घोरवेगिनः ।

---

१ मोघो क पाठः ।

Sampath_eBooks

घोरवेगिन इति, घोरो वेगो भूम्ना विद्यते येषाम् ॥

एतत्सप्तकं येषामास्पदं तान् क्रमेणाह

ओघे वसन्ति वै दिव्याः
पिशाचाः स्कन्ददेहजाः ॥४४२

त्रिंशत्कोटिसहस्राणि
स्कन्दस्यानुचराः स्मृताः ।
ते वै दिव्यैश्च कुसुमै-
रर्चयन्ति हरात्मजम् ॥४४३॥

तदूर्ध्वस्थे

अमोघे विनायका घोरा
महादेवसमुद्भवाः ।
त्रिंशत्कोटिसहस्राणि
तस्मिन् वायौ प्रतिष्ठिताः ४४४
ये हरन्ति कृतं कर्म
नराणामकृतात्मनाम् ।

अकृतात्मनामसंयमवताम् ॥

Sampath_eBooks

वज्राङ्केऽपि तथा वायौ
मातङ्गाः क्रूरकर्मिणः ॥४४५॥
भिन्नाञ्जननिभा घोरा-
स्तापना नाम विश्रुताः ।
तदारोहिणश्च
विद्याधराणामधमा
मनःपवनगामिनः ॥ ४४६ ॥

मनः पवनवन्मातङ्गारोहादेव गच्छन्ति तच्छीलाः, अत एवाधमाः । उत्तमास्तु विद्यादिप्रभावेणैव तत्तद्देशप्राप्तिमन्तः ॥ ४४६ ॥

किंच

ये विद्यापौरुषे ये च
वेतालादीञ्श्मशानतः ।
साधयित्वा ततः सिद्धा-
स्तेऽस्मिन् वायौ प्रतिष्ठिताः ४४७

विद्यापौरुषे शास्त्रविद्यादिस्पर्धायां तथा वेतालादीन् साधयित्वा ये प्रसिद्धा मृता इत्यर्थः ॥ ४४७ ॥

Sampath_eBooks

वैद्युतेऽप्सरसस्तस्मिन्
वासवेन प्रयोजिताः ।
तिष्ठन्ति सर्वदा तत्र
पृथिवीपुरपालने ॥ ४४८ ॥

पृथिवीपुरपालनं चैतत् तासां यत् तन्निवासिसदाचारजनपदस्य विमानैः स्वभूमिप्रापणम् ॥ ४४८ ॥

तदाह

भृगौ वह्नौ जले वापि
संग्रामेष्वनिवर्तकाः[1] ।
गोग्रहे बन्दिमोक्षे वा
म्रियन्ते पुरुषोत्तमाः ॥ ४४९ ॥
ते व्रजन्ति ततस्तूर्ध्वं
विमानैर्मणिचिह्नितैः ।
पताकादीर्घिकाकीर्णै-
र्दिव्यघण्टानिनादितैः ॥ ४५० ॥

न निवर्तन्त इत्यनिवर्तकाः, संमुखं ये म्रि-

1 मेष्व० क पाठः ।

Sampath_eBooks

यन्त इत्यर्थः। गवां ग्रहः सिंहादिभिराक्रमणम्। बन्द्यो बलाद्गृहीता हठम्रियमाणाः परयोषितः। एते च संग्रामादौ मृताः सदाचारत्वात् पुरुषोत्तमाः न तु पूर्वे

'असूर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो नराः ॥' (ईशा०३)

इति श्रुतौ तेषामनुत्तमत्वेनोक्तत्वात्[1]। तत इति स्वभूमेः ॥ ४५० ॥

कथं व्रजन्तीत्याह

स्त्रीसहस्रपरीवारै-
विमानैस्तान्नयन्ति ताः ।

यन्त[2] इति शेषः । ता इत्यप्सरसः ॥

रैवते तु महात्मानः
सिद्धा वै संप्रतिष्ठिताः ॥४५१॥
गोरोचनाञ्जने भस्म-
पादुके अजिनादि च ।
साधयित्वा महात्मानः
सिद्धास्ते कामरूपिणः ॥४५२॥

---

१ तत्वात् क पाठः । २ यः क पाठः ।

Sampath_eBooks

सिद्धाः संपन्नाः ॥ ४५२ ॥

ततश्चात्र

ते वसन्ति महात्मानो
दिव्यां सिद्धिमवस्थिताः ।

वज्राङ्कस्थत्वेन तद्रूपत्वात् विद्याधराधमा उक्ताः ॥

संवर्तेऽपि महावायौ
विद्याधरगणाः स्मृताः ॥४५३॥
दश त्रिंशच्च कोट्यस्ते
दिव्याभरणभूषिताः ।
दिव्यगन्धानुलिप्तास्ते
दिव्यस्रग्धामभूषिताः ॥४५४॥

दश ये गणाः संक्षेपतः त एव विस्तरतस्त्रिंशत्कोटय इत्यत्रार्थः । एते च विद्याधरा देवयोनिभेदा एव न तु मनुष्याः सन्तः खड्गादिसिद्ध्या सिद्धाः ॥

अथैतदुपरि

आग्नेया धूमजा मेघाः
शीतदुर्दिनदाः स्मृताः ।

Sampath_eBooks

विषावर्तं नावमिव
ते वायुं यान्ति मिश्रिता[1]: ॥४५५॥
तत्र गान्धर्वकुशला
गन्धर्वसहधर्मिणः।
वंशवीणाविधिज्ञाश्च
पक्षिणः कामरूपिणः ॥४५६॥

गन्धर्वसहधर्मिता गान्धर्वेण महेश्वराराधकत्वम् ॥ ४५६ ॥

ब्रह्मजा नाम वै मेघा
ब्रह्मनिःश्वाससंभवाः।
उपरिष्टाद्योजनशता-
द्दुर्जयस्योपरि स्थिताः ॥४५७॥

विषावार्ताख्यवायुव्याप्तयोजनशतोपरिष्टात् यो दुर्जयो नाम वायुः, तस्योपरि ब्रह्मजा मेघाः स्थिता इति संगतिः ॥ ४५७ ॥

किंच

तत्र वै दुर्जया नाम
इन्द्रस्य परिरक्षकाः।

---

१ संश्रिता इति पुस्तकान्तरपाठः।

Sampath_eBooks

परावहाभिधं वायुं
ते समाश्रित्य संस्थिताः ॥४५८॥
महावीर्यबलोपेता
दश कोट्यः प्रकीर्तिताः ।

तत्रेति दुर्जयसमीपे परावहाभिधं वायुं समाश्रित्येति संगतिः ॥

अतोऽप्यूर्ध्वं
पुष्करावर्तका नाम
मेघा वै पद्मजोद्भवाः ॥ ४५९ ॥

तथा
शक्रेण पक्षा ये च्छिन्नाः
पर्वतानां महात्मनाम् ।
परावहस्तान्वहति
मनुजानिव वारणः ॥४६०॥

तानिति पुष्करावर्तकान् पर्वतपक्षांश्च परावहाख्यो वायुर्वहति ॥ ४६० ॥

किंच
तस्मिन्वायुगमा नाम
गन्धर्वा गगनालयाः ।

Sampath_eBooks

एकादश तु वै कोट्य-
स्तेषां तु समुदाहृताः ॥४६१॥

तथा

जीमूता नाम ये मेघा
देवेभ्यो जीवसंभवाः ।
द्वितीयमावहं वायुं
मेघास्ते च समाश्रिताः॥४६२॥
तस्मिञ्जीमूतका नाम
विद्याधरगणा दश ।

जीवसमुद्भवा इति जीवः श्वासः, तत उद्भवाः । द्वितीयमावहमिति पुष्करावर्तकाश्रयं परावहमित्यर्थः, नतु प्रथमं दुर्जयानामाधारम् ॥

अथ

आवहस्तु[1] ततो वायु-
र्यत्र द्रोणाः समाश्रिताः॥४६३॥
तस्मिन्द्रोणाः समाख्याता
मेघानां परिरक्षकाः ।

१ महावहस्त इति पुस्तकान्तरपाठः ।

Sampath_eBooks

द्रोणा नाम मेघविशेषा अधोवर्तिमेघानाम-यथाकारित्वं रक्षन्ते ॥

यतः

हितार्थं तु प्रजानां वै
निर्मितास्ते मया पुरा ॥४६४॥

मयेति कैलासस्थेन–इति तत्र प्रवक्तुरुक्तिः । हितमधोवर्तिमेघेभ्य उपद्रवपरिरक्षा ॥ ४६४ ॥

अथैषाम्

उपरिष्टात्कपालोत्थाः
संवर्ता नाम वै घनाः ।
महापरिवहो नाम
वायुस्तेषां समाश्रयः ॥४६५॥

कपालोत्था इति ममैवेत्यर्थात् ॥ ४६५ ॥

उपसंहरति

आद्ये वायुपथे ह्येवं
मेघा वै वायुभिः सह ।
सिद्धाश्च पतयश्चैव
कथिता मेघचारिणः ॥४६६॥

Sampath_eBooks

दशसहस्रोन्मानो योऽयमाद्यो वायुपथस्तस्य भुव ऊर्ध्वं शून्यं पञ्चाशद्योजनानि, तदूर्ध्वमृतर्द्धिः, प्राचेतसः, सेनानीः, सत्त्ववहः, ओघः, अमोघः, वज्राङ्कः, वैद्युतः, रैवतः, संवर्तः, विषावर्त इति । एत एकादश ये वायवस्तेषां मध्यात्सेनानीः सत्त्ववहश्च शते शते योजनानां स्थितः, शेषाः प्रत्येकं पञ्चाशद्योजनावस्थितय इति कलनया भूपृष्ठाद्विषावर्तान्ते योजनसप्तशती । तदुपरि सहस्रनवके शतत्रये च दुर्जयपरावहद्वयावहावहमहापरिवहाख्याः पञ्च वायवः स्थिता इति ॥ ४६६ ॥

आद्यं वायुपथं वितत्योक्त्वा, अन्यान् संक्षेपेण विभजते

द्वितीये वायुपथे ज्ञेया
अग्निकन्याश्च मातरः ।
ता वसन्ति गुणोपेता
रुद्रशक्त्या त्वधिष्ठिताः ॥४६७॥

मातरोऽपरेण रूपेण ब्राह्म्याद्याः । गुणेन सर्वज्ञत्वादिनोपेता यतो रुद्रशक्त्यधिष्ठिताः ॥४६७॥

Sampath_eBooks

अथ

तृतीये वायुपथे चैव
वसन्ते सिद्धचारणाः ।
स्वकर्मभोगसंसिद्धाः
सर्वसिद्धैरधिष्ठिताः ॥४६८॥

स्वं प्राक्तनं शुभं कर्म, भोगस्तत्तत्पदोचित-सुखात्मकः, तद्वशेन संसिद्धाः प्राप्ततत्पदाः । सर्वसिद्धैरप्यन्यैरपि तत्तत्पदोचितयोगसिद्धैरधिष्ठिता आसादिताः ॥ ४६८ ॥

तदुपरि

चतुर्थे पथि चैवात्र
वसन्त्यायुधदेवताः ।
नाराचचक्रचापर्ष्टि-
शूलशक्तीषुमुद्गराः ॥४६९॥

ऋष्टिरायुधविशेषः । एते च खड्गखट्वाङ्गादीनपि उपलक्षयन्ति । आयुधानामेव च तद्देवतानाम ॥ ४६९ ॥

अथ

पञ्चमे पथि देवेशि
वसन्त्यैरावतादयः ।

Sampath_eBooks

ऐरावतोऽञ्जनश्चैव
वामनश्च महागजः ॥४७०॥
सुप्रतीको गजेन्द्रश्च
पुष्पदन्तस्तथैव च ।
कुमुदः पुण्डरीकश्च
सार्वभौमोऽपि चाष्टमः ॥४७१॥

वामनस्य विशेषणं महागज इति । तथा सुप्रतीकस्य करीन्द्र इति ॥ ४७१ ॥

त एते

दिग्गजा इति विख्याताः
स्वासु दिक्षु व्यवस्थिताः ।

व्यवस्थिता इति पूर्वादिक्रमेण नभस्येव ॥

ततोऽपि

षष्ठे वायुपथे देवि
पक्षिराजो महाबलः ॥४७२॥
गरुत्मानिति विख्यातो
दुर्जयोऽतीव वीर्यवान् ।

Sampath_eBooks

सप्तमे व्योमगङ्गा तु
नानाजलचरानुगा ॥४७३॥
दिव्यामृतजला पुण्या
त्रिधा सा परिकीर्तिता ।

दिव्यममृततुल्यं जलं यस्याः सा । त्रिधेति सत्यलोकस्वर्लोकभुवर्लोकस्थित्या ॥

सा भ्रान्ता नभसो मध्ये
समन्तात्परिमण्डला ॥४७४॥
आकाशगङ्गा प्रथिता
देवानां सततोत्सवा ।
पुष्पमालेव सा भाति
नभसः शिरसि स्थिता ॥४७५॥
तत्र सिद्धैर्महाभागै-
र्विद्याधरगणैस्तथा ।
गन्धर्वैरप्सरोभिश्च
साध्यैर्विश्वैर्मरुद्गणैः ॥४७६॥
रुद्रैर्वसुभिरादित्यैः
पितृदेवमहर्षिभिः ।

Sampath_eBooks

रक्षोभिर्गुह्यकैश्चैव
दिव्यस्तुतिपरायणैः ॥४७७॥
स्तुवद्भिश्च जपद्भिश्च
गायद्भिश्च महात्मभिः ।
नृत्यद्भिर्वल्गमानैश्च
दिव्यदुन्दुभिनिःस्वनैः ॥४७८॥
भेरीमृदङ्गवाद्यैश्च
वल्लकीनां च निःस्वनैः ।
वंशवादित्रनादैश्च
मनोवायुसमीरितैः ॥४७९॥

तत्र सिद्धैरिति सिद्धादिभिरुपलक्षिता । रुद्रादीनां त्रयाणां विशेषणं पितृदेवैरिति । स्तुवद्भिश्चेत्यादिभिर्विशेषणैः पूर्वे यथायोगं विशेष्याः । दिव्यदुन्दुभिनिःस्वनैरित्याद्या नृत्तं वल्गनं च प्रति हेतुतृतीयाः। मनोधिष्ठितेन वायुनेति प्राणेन समीरितैः पूरितैरिति योज्यम् ४७९

किंच

वैदूर्यनालैः कमलै-
र्हैमपत्रैः सुगन्धिभिः ।

Sampath_eBooks

केसरैः पद्मरागैश्च
महाचक्रप्रमाणकैः ॥ ४८० ॥
नृत्यन्तीव सरिच्छ्रेष्ठा
विमानशतमण्डिता ।
मण्डिता च वनैर्दिव्यै-
र्धर्माधारा महानदी ॥४८१॥

केसरैः पद्मरागैरिति पद्मरागात्मककेसरयुक्तैः पद्मैरित्यर्थः । धर्म आ समन्ताद्धार्यते दर्शनस्पर्शनादिना संपाद्यते यया ॥ ४८१ ॥

युक्तं चैतत् यतः

मम नेत्राद्विनिष्क्रान्ता
क्रियाशक्तिः परा हि सा ।

एतत्पूर्वमेव निर्णीतम् ॥

सैषा

महामन्दाकिनी देवी
त्रिदशैः पर्युपासिता ॥४८२॥
महाविमानकोटीभि-
र्निरन्तरमवस्थितैः ।

Sampath_eBooks

शोभितासौ भगवती
नित्यमास्ते नभस्तले ॥४८३॥

महत्त्वं प्रभावातिशयादस्याः। अवस्थितैरिति त्रिदशविशेषणम् ॥ ४८३ ॥

तत्रैषा मेरुशिरसि
मम वै मस्तकाच्च्युता ।
पपात धरणीपृष्ठे
लोकानां हितकाम्यया ॥४८४॥

एषा गङ्गा पूर्ववर्णितयुक्त्या देवैरभ्यर्थितेन मया मर्त्यलोकपावनाय समाहूय विसृष्टा सती मेरुशिरःस्थितस्य मम मस्तकं प्राप्य, ततश्च्युता मेरुशिरसि स्थिता, पश्चात् धरणीपृष्ठे पपातेति संगतिः । उक्तं च प्राक्

'आगत्य मम मूर्धानं मेरुमूर्ध्नि पुनर्गता ।
तस्मान्निर्गत्य देवेशि चतुर्दिक्षूदधिं गता ॥' (१०।१८१)

इति ॥ ४८४ ॥

Sampath_eBooks

किंच मदीयनियतिशक्तिनियन्त्रणतः

अक्षोभ्या साप्यसौ गङ्गा
तिष्ठत्यनिलधारिता ।

अन्यथा कथमनिलेन न क्षोभ्येत कथं वाह्येत ॥

योजनानां शतं पूर्णं
विस्तारोऽस्याः प्रकीर्तितः ४८५

परिणाहस्ततः कोट्यः

तत इति तस्मिन्नाकाशे । कोट्य इति बह्वयः कोटय इत्यर्थः ॥

एषा चात्र

महावेगवती शुभा ।

सा भ्रमन्तीव संतिष्ठे-
त्समन्तात्परिमण्डला ॥ ४८६ ॥

परिमण्डलेति ब्रह्माण्डान्तराकाशस्य तथात्वात् ॥ ४८६ ॥

ध्रुवमापूर्य सा देवी
त्वत्यद्भुतमवस्थिता ।

Sampath_eBooks

ध्रुवमिति तन्नाभिनिबद्धभचक्रमित्यर्थः । देवी द्योतमाना । अत्यद्भुतं कृत्वावस्थिता ॥

किंच

दिव्यामृतवहा पुण्या
सर्वपापप्रणाशिनी ॥४८७॥

दिवि भवं दिव्यं लोकोत्तरममृतं जलं वहति ॥ ४८७ ॥

अथ

अष्टमे वृषराजस्तु
सपत्नीकः सनन्दनः ।
वसति स्वप्रतीघातः
प्रत्यक्षो धर्म एव सः ॥४८८॥

वृषराज इति महेश्वरस्य वाहनम् । अप्रतीघातः स्वेच्छाविहारी । धर्म इति

'वृषो धर्मः स देवस्य गुणो ज्ञानक्रियात्मकः ।
धत्ते स चिदचिद्यस्माद्धर्मस्तेनोच्यते बुधैः ॥'

इति श्रीमन्मयसंग्रहोक्तसतत्त्वः ॥ ४८८ ॥

नवमे पथि चात्रास्ते
दक्षो नाम प्रजापतिः ।

Sampath_eBooks

ब्रह्मैव साक्षाद्वसति
ब्रह्मशक्त्या त्वधिष्ठितः ॥४८९॥

ब्रह्मणः शक्तिर्निर्मातृरूपा ॥ ४८९ ॥

दशमे वायुपथे देवि
वसुरुद्रदिवाकराः ।

एते च पूर्वं गङ्गासेवार्थमितोऽवतीर्णा वर्णिताः ॥

तत्र प्राधान्यादादौ रुद्रान्नामतो दर्शयति

अत्र चाङ्गारकः सर्पि-
र्नैर्ऋतः सदसत्पतिः ॥४९०॥

बुधश्च धूमकेतुश्च
विख्यातश्च ज्वरस्तथा ।

अजश्च भुवनेशश्च
मृत्युः कापालिकस्तथा ४९१

एकादश स्मृता रुद्राः
सर्वकामफलोदयाः ।

सदसत्पतिरिति यः क्वचिदुक्तः । ज्वरो

Sampath_eBooks

विख्यातः त्रिजगत्प्रसिद्धः। सर्वेषां कामफलानामुदयो येभ्य इति समासः॥

तदित्थं

धाता ध्रुवश्च सोमश्च
वरुणश्चानिलोऽनलः ॥४९२॥
प्रत्यूषश्च प्रदोषश्च
वसवोऽष्टौ प्रकीर्तिताः।

तदित्थं

वसवः कथिता ह्येते
आदित्यांश्च निबोध मे ॥४९३॥
अर्यमा इन्द्रवरुणौ
पूषा विष्णुर्गभस्तिमान्।
मित्रश्चैव समाख्यात-
स्त्वजघन्यो जघन्यकः ॥४९४॥
विवस्वांश्चैव पर्जन्यो
धाता वै द्वादशः स्मृतः।
काश्यपेयान्विदुस्त्वेतान्

Sampath_eBooks

कश्यपस्यामी काश्यपेयाः कश्यपापत्यानी- त्यर्थः ॥

तेषां तेजोनिधेरथ ॥ ४९५ ॥

अमृतोद्भवो रथो दिव्यः
सर्वदेवसमन्वितः ।

तेषां वसुरुद्रादित्यानां मध्यात् तेजोनिधेरादित्यस्य क्षीरोदोद्भवो रथः तस्यैव तदारूढस्य जगत्प्रकाशाय नियुक्तत्वात् । तेजोनिधेश्चिदर्कस्य परशक्त्यमृतोत्थितः पूर्वोक्तदृशा सर्वदेवमयः प्राणरूपो रथ इत्यपि सूचितम् ॥

अनेन यदुक्तं सर्वदेवमय इति, तद्विभजते

यज्ञश्चक्रं रथे तस्मि-
न्सर्वज्ञानमयी च धूः ॥४९६॥
सप्ताश्वाश्च स्वराः सप्त
वेदहूंकारनिःस्वनाः ।
नागा योक्त्राणि तेषां वै
अरुणश्चैव सारथिः ॥४९७॥
सत्यं च मञ्चकं तस्य
वायुर्वेगो रथस्य तु ।

Sampath_eBooks

यज्ञः क्रियाशक्त्यात्मा देवता अस्य रथस्य चक्रं तद्वशादूर्ध्वाधरस्थसर्वलोकयात्रासंपत्तेः । यदुक्तं गीतासु

'तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।' (भ० गी०)

इति । विश्वान्यजतीत्याम्नातत्वात् सर्वशास्त्रज्ञानमयी वागीश्वरी अस्य धूः, यत्र लग्ना अश्वा वहन्ति । ते च समस्तवाचकात्मकवेदप्रधानभूतहूंकाररूपहेषाशब्दव्यञ्जकाः षड्जाद्याः सप्त स्वराः । एवं च नदन्नादामर्शोत्थितत्वं ज्ञानक्रियादेवताकाण्डरूपत्वात्परापरतदुभयसिद्धिमयत्वं च ऊर्ध्वाधरशक्तिसंबन्धेन वेदानां प्रतिमन्त्रमुद्रास्थानीयत्वेन दर्शयति । योक्त्राणि बन्धनरज्जवः । नागा अनन्ताद्याः । तेषां षड्ङ्गादीनाम् । न अगाः सततगतिशीलाः संकल्पा नियोक्तारः । अरुणोऽनूरुर्दीप्तोऽहंकारश्च । सत्यं च ऋतम् । मञ्चकमासनम् । प्रतिप्रकाशमाने विश्वत्र साध्वाधारतया स्थितं सत्त्वात्मकं बुद्धितत्त्वम् । रथस्य वेगो वाय्वाख्या देवता । प्राण-

१ यजेत्या० क पाठः । २ नर्मा० क पाठः । ३ 'स्थिततत्त्वं' क पाठः ।

Sampath_eBooks

नात्मन आन्तरस्य च रथस्य प्राणापानादिरूपो वाय्वात्मैव वेगः ॥

तदेवमीदृग्रथारूढस्य

नवयोजनसाहस्रो
विग्रहो भास्करस्य तु ॥४९८॥
त्रिगुणं मण्डलं तस्य
त्रैलोक्ये भाति भास्वरम् ।

जीवादित्यस्यापि नवतालो विग्रहः। मण्डलं च प्रकाशात्मकं त्रिभिः सत्त्वादिभिर्गुणैरुपेतम् ॥

स चायमसामान्य इत्याह

ज्ञानशक्तिः परा ह्येषा
तपत्यादित्यविग्रहा ॥ ४९९ ॥

सर्वशक्तेर्महेश्वरस्य विश्वप्रकाशिका ज्ञान-शक्तिर्जीवादित्यबाह्यादित्यरूपतया स्थितेत्यर्थः॥

इत्थं पारमेशज्ञानशक्त्यात्मका द्वादशादित्याः

मासवारप्रयोगेण
संचरन्ति शिवेच्छया ।

मासेन वारः, स एव प्रयोगो नियोगः। जी-

Sampath_eBooks

वादित्यस्य मासादिविभागः प्रागेव निर्णीतः। द्वादशधात्वं चास्य बुद्धिभेदात्। शिवेच्छयेति नात्रान्यस्येच्छा प्रभवतीत्यर्थः॥

अतश्च

अहोरात्रं भ्रमन्त्येते
भुवर्लोकं[1] समन्ततः ॥५००॥

एतच्च[2]

'उदयो योऽमरावत्या..................।'

इति प्रोक्तानुसारेण योज्यम्। यत्तु—बृहट्टीकाकारराजानकभुल्लकेन यावदशेषभुवनप्रकाशनव्याप्तिः सूर्यस्य नास्ति, तावत्सूर्यसंयमात् भुवनज्ञानं कथं पतञ्जलिनोक्तम्, अत आ पातालात् सत्यलोकान्तं सूर्यस्य प्रकाशकत्वमिति स्वरुच्या व्याख्यातं—तदसारत्वादुपेक्ष्यम्॥५००॥

अथ सूर्योपरि चन्द्रादीनां स्थितिविभागमाह

ततः सोमस्तु लक्षेण
आदित्योपरि संस्थितः।

---

१ 'भुवोलो०' क पाठः। २ 'अतश्च' क पाठः।

Sampath_eBooks

आप्याययञ्जगत्सर्वं
सुधाधाराप्रवर्षणैः ॥ ५०१ ॥

इत्थं च

चन्द्ररूपेण तपति
क्रियाशक्तिः शिवस्य तु ।
इन्दूर्ध्वे लक्षमात्रेण
स्थितं नक्षत्रमण्डलम् ॥५०२॥

नक्षत्रमण्डलं ताराचक्रम् ॥ ५०२ ॥

लक्षद्वयेन तस्योर्ध्वं
संस्थितो भूमिनन्दनः ।
लक्षद्वयेन तस्योर्ध्वे
संस्थितः सोमनन्दनः ॥५०३॥
सुराचार्योऽपि तस्योर्ध्वे
द्विलक्षेणैव संस्थितः ।
तस्योर्ध्वेऽपि द्विलक्षेण
तिष्ठते भृगुनन्दनः ॥५०४॥
तस्योपरि द्विलक्षेण
सौरिः सर्पति लीलया ।

Sampath_eBooks

सर्पति राशिषु संचरति । लीलयेति मन्द-मन्दं, यतोऽयं शनैश्चरः ॥

तस्योपरि

लक्षमात्रेण तु ऋषीन्
कथयामि समासतः ॥५०५॥

तान्यथावस्थिति क्रमेणाह

अत्रिश्चैव वसिष्ठश्च
पुलस्त्यः पुलहः क्रतुः ।
भृग्वङ्गिरा मरीचिश्च

भृग्वङ्गिरा गोत्रनामक्रमाभ्यामेक एव ॥

एते सप्त

ऋषयः संप्रकीर्तिताः ॥५०६॥
यमनियमतो ह्येते
शापानुग्रहकारकाः ।

अहिंसाद्या यमाः । शौचाद्या नियमाः॥५०६॥

किंच

भीताश्च परपीडायाः

Sampath_eBooks

प्रत्यवायिनामपि निग्रहं न कुर्वन्ति दया-परतन्त्रत्वात् ॥

तथा

शूराः शास्त्रविचारणे ॥५०७॥

शूरास्तीक्ष्णधियः ॥ ५०७ ॥

अत एवानुग्राह्याणां

ज्ञानखड्गोद्यताः सर्वे
त्वज्ञानपटलापहाः ।

अज्ञानमेव चित्प्रकाशावरकत्वात् पटलस्त-मपघ्नन्ति ॥

तदर्थमेव च

मन्त्रयोगक्रियाचर्या-
संनद्धा दुरतिक्रमाः ॥५०८॥
योगैश्वर्यगुणोपेताः
शिवाराधनतत्पराः ।

मननसारा मन्त्राः, योगो ध्यानधारणादिः, क्रिया नित्यनैमित्तिकानुष्ठानं, चर्या व्रतादिरूपा, एतैर्मन्त्रादिभिः संनद्धाः परिष्कृताः। अत एव

Sampath_eBooks

दुरतिक्रमाः अज्ञानेन न कदाचिदभिभूयन्ते । अतश्च योगैश्वर्यगुणैरणिमादिसिद्धिभिरुपेताः । तथापि शिवाराधनप्रधानकर्मणि तत्पराः नित्यासक्ताः ॥

अथ

तेभ्यो लक्षाद्ध्रुवो देवि
तारकाः स चतुर्दश ॥५०९॥

एक एव सन् ॥ ५०९ ॥

अतश्चतुर्दशभिस्तारकाभिः

शरीरं घटितं ताभि-
र्ध्रुवस्य वरवर्णिनि ।

तथाच

'उत्तानपान्मखहनुः शुचिधर्ममूर्धा
नारायणाश्विवरुणार्यमहृत्पदोरुः[1] ।
संवत्सरप्रजननो जघनस्थमित्रो
वह्नीन्द्रकश्यपमरीच्यभयाख्यपुच्छः ॥'

इति ज्योतिःशास्त्रे हनुशिरःप्रभृतिगात्रारम्भोऽस्य यज्ञधर्मादिदेवताभिरुक्तः ॥

१ 'पदोनः' क. पाठः ।

Sampath_eBooks

एष च

ब्रह्मैवापररूपेण
ब्रह्मस्थाने नियोजितः ॥५१०॥

सत्यलोकस्थो ब्रह्माण्डेनापररूपेण भुवर्लोकमध्ये नियुक्तः ॥ ५१० ॥

इत्थं मध्ये चक्रनाभिवदवस्थितस्य

तस्य ज्योतिर्गणो देवि
निबद्धो भ्रमते सदा ।
निश्चलः स तु विज्ञेयः
शिवशक्त्या त्वधिष्ठितः ॥५११॥

शिवशक्त्यैवेत्थं व्यवस्थापित इत्यर्थः । एष चान्तरस्थित्या अविचलश्चिदात्मैव समध्यवाहत्रयोदशेन्द्रियताराचक्रपरिवृतः कालाधिकारोक्तस्थित्याशेषग्रहर्क्षाद्याश्रयणप्राणापानसूर्यसोमसंचारप्रवर्तक इति बोद्धव्यम् । अत एवात्मप्रतिनिधिरूपध्रुवस्य

'यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते ।
अधिकं च भवत्यायुर्ध्रुवान्तानां समाः समाः ॥'

इत्यस्य ज्योतिःशास्त्रादौ श्रूयते । यत्तु तत्र

१ 'नीत्या' क पाठः ।

Sampath_eBooks

ध्रुवनाभिनिबद्धस्य ग्रहनक्षत्रचक्रस्य बहिर्भूगोलं यन्निवर्तनं, सूर्यादीनां भूम्यादेश्च अन्यथावस्थानपरिमाणादि श्रूयते, तत्

'यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥'

(बृ० जा० १।३)

इति तदुक्तप्रक्रिययैव पूर्वकर्मानुसारितेजोगोलकाधिष्ठातृसूर्यादिरूपदेवतापेक्षया[1] कर्मार्जनस्थानस्थभूम्यपेक्षया च तथा, इदं तु तेजोगोलकाद्यधिष्ठातृसूर्यादिरूपदेवतापेक्षया । यथोक्तप्रक्रिययैव सूर्यादीनामवस्थानसंनिवेशभ्रमणादि पातालभूम्यादिपरिमाणादि वास्तवम् । सर्वसर्वज्ञमहेश्वरपरिदृष्टमेतदेवेति न तेन सह संवादविसंवादादिचर्चा कार्या । अत एव

'शास्त्रान्तरैर्न यद्दृष्टं तद्दृष्टं पारमेश्वरे ।
नियत्यादि शिवान्तं वाक्[2] क्वान्यत्र परिदृश्यते ॥'

इतीयमेव प्रक्रिया साध्वी ॥ ५११ ॥

दश पञ्च च लक्षाणि
ध्रुवान्तं भूमिमण्डलात् ।

१ कामिमात्ररूप सूर्याद्य० क पाठः । २ क्वान्यत्र परिदर्शितम् क पाठः ।

Sampath_eBooks

भुवः सूर्येन्दुभचक्राणि प्रत्येकं लक्षान्तरितानि, प्रत्येकं लक्षद्वयेन भौमाद्याः पञ्च, लक्षेण सप्तर्षयः, लक्षेण ध्रुव इति पञ्चदशलक्षमेव ध्रुवान्तं भवति ॥

किंच

वायुस्कन्धान्स्थितांस्त्वत्र
कथयामि समासतः ॥५१२॥

अत्रेति पञ्चदशयोजनलक्षोन्मानभुवःस्वर्लोकद्वये । ईश्वरशक्तिनियमितवायुसंनिविष्टभुवनादिरूपान् वायुस्कन्धान् कथयामि ॥५१२॥

तेषां कक्ष्याभेदमाह

आ मेघाद्भास्करात्सोमा-
न्नक्षत्राद्ग्रहमण्डलात् ।
ऋषिसप्तकनिर्देशा-
दाध्रुवान्तं च सप्तमः ॥५१३॥

आ मेघादिति प्रोक्तवायुपथगतेभ्यो मेघेभ्यः प्रभृति ध्रुवान्तं सप्तसु कक्ष्यासु सप्त वायुस्कन्धाः स्थिताः । यदुक्तं पुराणेषु

Sampath_eBooks

'पृथिव्यां प्रथमः स्कन्ध आ मेघेभ्यो य आवहः।
द्वितीयश्चापि मेघेभ्य आ सूर्यात्प्रवहस्तु यः॥
सूर्यादूर्ध्वं तथा सोमादुद्वहो यस्तु वै स्मृतः।
सोमादूर्ध्वं तथर्क्षेभ्यश्चतुर्थः संवहस्तु यः॥
ऋक्षोर्ध्वं ग्रहपर्यन्तं पञ्चमो विवहस्तु यः।
ऊर्ध्वं ग्रहादृषिभ्यस्तु षष्ठो योऽसौ परावहः॥
सप्तर्षिभ्यस्तथैवोर्ध्वमा ध्रुवात्सप्तमः स्मृतः।
वातस्कन्धः परिवहः·····················॥'

इति। तत्रैव च प्रत्येकं शुक्रज्योतिःसत्यज्योतिश्चित्रज्योतिर्ज्योतिष्मानित्यादिसंज्ञाः सप्त सप्तावान्तरभेदा उक्ताः॥ ५१३॥

तदयम्

आदित्यादिध्रुवान्तश्च
स्वर्लोकः परिकीर्तितः।
अत्र राजा महेन्द्रो वै
तिष्ठते सुरपूजितः॥५१४॥
ऋषिदेवैः सगन्धर्वै-
र्वृतश्चाप्सरसां गणैः।

भूपृष्ठादादित्यान्तो भुवर्लोको[1] योजनानां लक्षमेकम्। ततो ध्रुवान्तः स्वर्गलोकश्चतुर्दश लक्षाणि

---

1 भुवोलोको ख पाठः।

Sampath_eBooks

ईदृशं चामुम्

अग्निहोत्रं क्रतून्वापि
कृत्वा ज्ञानविवर्जिताः ॥५१५॥
स्वर्लोकं तु नरा यान्ति
पुनरायान्ति मानुषम् ।

अग्निहोत्रं नित्याग्निनिष्ठो होमः, क्रतवस्तु ज्योतिष्टोमादयः । ज्ञानविवर्जितत्वात् देहान्ते स्वर्लोकं यान्ति । तत्र स्वकर्मोपचितफलं भुक्त्वा पुनर्मानुषादिकमायान्ति । ज्ञानिनस्तु यज्ञादि कुर्वन्तोऽपि निष्कामत्वात् मुच्यन्ते इत्याशयः ॥

इत्थमेवंविधस्य

स्वर्लोकस्योपरिष्टात्तु
द्वे कोटी योजनानि तु ॥५१६॥
पञ्चाशीतिश्च लक्षाणि
महर्लोको वरानने ।

एवमिहत्यप्रक्रियया सूर्यान्तो भुवर्लोकः । ध्रुवान्तः स्वर्लोकः, तदूर्ध्वे सपञ्चाशीतिलक्षं

१ महोलोक ख पाठः २ र्ध्वं प० क पाठः ।

Sampath_eBooks

कोटिद्वयं महर्लोकः। श्रीपरामृगेन्द्रादौ तु ध्रुवान्तो भुवर्लोकः, तदूर्ध्वं

'पञ्चाशीतिमितैर्लक्षैः स्वर्लोकः स्वर्गसंश्रयः।
कोटिद्वयं महर्लोको महान्तो यत्र संस्थिताः ॥'

इति

'तिथिलक्षैर्भुवर्लोको ध्रुवप्रान्तो महीतलात्।
तदूनकोटिः स्वर्लोक························॥'

इति प्रक्रियाभेदो दृश्यते, स तद्ग्रन्थसंग्रहकर्तृभिस्तथानिबद्धत्वात्। इदं तु साक्षात्परमेश्वरेणोक्तं

'भूर्भुवःस्वर्ध्रुवान्तं स्याल्लक्षाणि···········।
············ महान् कोटिद्वयं भवेत् ॥'

इति किरणादिग्रन्थेन भगवदुक्तेन च ससंवादमित्ययमेव क्रमो युक्तः ॥

अत्र महर्लोके

ऋषयश्चैव सिद्धाश्च
मार्कण्डाद्या वसन्ति वै ॥५१७॥

अथ

कोट्यष्टकं महादेवि
योजनानां वरानने।

---

१ क्षे क पाठः।

Sampath_eBooks

महर्लोकोपरिष्टात्तु
जनलोको[1] व्यवस्थितः ॥५१८॥

किंच

एकपादोऽथ जह्नुश्च
कपिलश्चासुरिस्तथा ।
भौतिको वाड्वलिश्चैव
जनलोकनिवासिनः[2] ॥ ५१९ ॥

अथ

द्वादशैव तथा कोट्यो
जनलोकोर्ध्वतः प्रिये ।
तपोलोकः समाख्यात
ऋषियोगेश्वराकुलः ॥ ५२० ॥

तानाह

सनकश्च सनन्दश्च
सनत्कुमारः सनन्दनः ।
शङ्कुश्चैव त्रिशङ्कुश्च
तपोलोकनिवासिनः ॥५२१॥

१,२ नौलो० ख पाठः ।

Sampath_eBooks

अथ प्रसङ्गाद्भूर्लोकात् सत्यलोकान्तं भुवनसंख्यामाह

पद्माः षट्पञ्चपञ्चाश-
त्कोट्यो लक्षाणि विंशतिः ।
भूर्लोकान्तं समारभ्य
यावत्सत्यं वरानने ॥५२२॥
इयं संख्या समाख्याता
भुवनानां वरानने ।

परमेश्वरेण बृहत्तन्त्र इति शेषः । पद्मसंख्या एकादशपटले वक्ष्यमाणा ॥

प्रकृतमाह

कोट्यः षोडश मानेन
तपोलोकोर्ध्वतः प्रिये ॥५२३॥
सत्यलोकः समाख्यातो
यत्र ब्रह्मा स्वयं[1] स्थितः ।
क्रीडते भगवान्देवो
वृत आत्मसमैर्द्विजैः ॥५२४॥

---

1 व्यव० क पाठः ।

Sampath_eBooks

यतस्ते तत्र

कर्मज्ञानेन संसिद्धा
अद्वैतपरिनिष्ठिताः ।
आनन्दपदसंप्राप्ता
आनन्दपदमागताः ॥५२५॥

कर्मणा नित्यनैमित्तिकानुष्ठानेन ज्ञानेन च वेदान्तोक्तेन समुच्चितेन सम्यक् सिद्धाः, अत एव 'विज्ञानमानन्दं ब्रह्म' इत्युक्ताद्वैतपदे परिनिष्ठिता रूढभावनाः, अतश्च सत्यलोकाख्यमिदमानन्दपदं महाभोगस्थानं संप्राप्ताः अधिरूढाः, अत्रापि चानन्दपदमागताः स्वात्मारामा एवेत्यर्थः ॥ ५२५ ॥

किंच

ऋग्वेदो मूर्तिमांस्तस्मि-
न्निन्द्रनीलसमद्युतिः ।
दिव्यगन्धविलिप्ताङ्गो
दिव्याभरणभूषितः ॥५२६॥

Sampath_eBooks

संस्थितः पूर्वतस्तस्य
दीप्यमानः स्वतेजसा ।
उत्तरेण यजुर्वेदः
शुद्धस्फटिकसंनिभः ॥ ५२७ ॥
दिव्यकुण्डलधारी च
महाकायो महाभुजः ।
स्थितः पश्चिमदिग्भागे
सामवेदः सनातनः ॥ ५२८ ॥
रक्ताम्बरधरः श्रीमान्
पद्मरागसमप्रभः ।
स्रग्दामधारकश्चित्र-
मालाभूषणभूषितः ॥ ५२९ ॥
अथर्वाञ्जनवच्छ्यामः
स्थितो दक्षिणतस्तथा ।
पिङ्गाक्षो लोहितग्रीवो
हरिकेशो महातनुः ॥ ५३० ॥

ऋचां कर्मदेवतास्तुतिमात्रपरायणानामनु-

१ लम्ब. क पाठः ।

Sampath_eBooks

ष्ठानास्फुटतया श्यामता । यजुषां तु तत्स्फुटतया सितत्वम् । साम्नां गीतिप्राधान्येन रञ्जकत्वाद्रक्तत्वम् । अथर्वण अभिचाराद्यैहिककर्मपरतया कृष्णत्वं शबलता च ॥ ५३० ॥

किंचात्र

षडङ्गानीतिहासाश्च
पुराणान्यखिलानि तु ।
वेदोपनिषदश्चैव
मीमांसारण्यकं तथा ॥ ५३१ ॥
स्वाहाकारवषट्कारौ
रहस्यानि तथैव च ।
गायत्री च स्थिता तत्र
यत्र देवश्चतुर्मुखः ॥ ५३२ ॥

अङ्गानीति वेदस्य शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिःशास्त्राणि । इतिहासा भारतादीनि । व्यासाद्युक्तानि शास्त्राणि पुराणानि । वेदोपनिषदो वेदान्ताः । वेदविचारशास्त्रं मीमांसा । आरण्यकं बृहदारण्यकं वेदान्तेऽपि पृथ-

Sampath_eBooks

गुक्तमरण्येऽनूद्यमानत्वात् । दीप्याप्यायत्रिषयौ मन्त्रौ स्वाहाकारवषट्कारौ । रहस्यानि तैत्तिरीयादिवेदान्तविशेषा रहस्यत्वादेव पृथगुक्तानि । गायत्री वेदमाता । सर्वा एता आकृतिमत्यो देवताः ॥ ५३२ ॥

सोऽयं सत्यलोकः

भोगस्थानं ब्रह्मणः स्यात्

स तत्र निर्वर्तिताधिकारः

परं ब्रह्म ततो व्रजेत् ।

अनाकृति विज्ञानमानन्दं ब्रह्मेति यदुक्तं, तदित्यर्थः ॥

अथ

कोटियोजनमानेन

सत्यलोकोर्ध्वतः प्रिये ॥५३३॥

ब्रह्मासनमिति ख्यातं

जपासिन्दूरसप्रभम् ।

आस्यतेऽस्मिन्नित्यासनं भुवनं सत्यलोकस्योर्ध्वम् ॥

Sampath_eBooks

तत्रासौ

रक्तेन्दीवरमध्यस्थः
पद्मरागसमप्रभः ॥ ५३४ ॥
चतुर्मुखश्चतुर्वेद-
श्चतुर्युगवशानुगः ।
ब्रह्मविद्भिः समाकीर्णो
ब्रह्मा मुनिनिषेवितः ॥ ५३५ ॥
ऐश्वर्याष्टकसंयुक्तः
षड्विधसृष्टिकारकः ।
धर्मादिफलसंबन्ध-
प्रदाता च युगे युगे ॥ ५३६ ॥
तिर्यङ्नारकिसत्त्वानां
दिव्यानां मनुजैः सह ।
स्रष्टा च सर्वभूतानां
सदेवासुरमानुषे ॥ ५३७ ॥

चत्वारो युगा वशा अनुगा यस्येति पूर्वनि-
पातव्यत्ययः । ऐश्वर्याष्टकमणिमादि । षड्विधे-

Sampath_eBooks

ति नारकिस्थावरसरीसृपादिपश्वन्ता त्रिविधा तामसी, रजस्तमोमयी मानुषी, रजःसत्त्वरूपा मौनी, सात्त्विकी दैवी चेत्येकादशे भविष्यति । युगे युग इति धर्मादिफलप्रदः । तिर्यगादीनां सर्वेषां भूतानां चतुर्दशसंख्यानां सदेवासुरमानुषे जगति स्रष्टा ॥ ५३७ ॥

अथ

कोटिद्वयं तदूर्ध्वे तु
योजनानां वरानने ।
नीलेन्दीवरसंकाशा
इन्द्रनीलसमप्रभा ॥ ५३८ ॥
ब्रह्मलोकात्परत्वेन
विष्णोश्चैव पुरी स्मृता ।
सर्वकामसमोपेता
सर्वरत्नसमुज्ज्वला ॥ ५३९ ॥
मरकतस्तम्भसोपाना
नीलध्वजसमाकुला ।

Sampath_eBooks

घण्टावितानविस्तीर्णा
चारुचामरशोभिता ॥ ५४० ॥
नीलोत्पलदलप्रख्यैः
कन्यावृन्दैः समावृता ।
कामकार्मुकनिर्घोष-
वित्रस्तमृगलोचनैः ॥ ५४१ ॥
नूपुरारावमुखरैः
स्खलद्भिर्मृदुविभ्रमैः ।
मनोभवशरायास-
निपातशतजर्जरैः ॥ ५४२ ॥
सुघूर्णितमदायास-
विलोलधवलेक्षणैः ।
संसेव्यते स भगवा-
न्विष्णुः कमललोचनः ॥ ५४३
इन्द्रनीलसमाकारो
नीलोत्पलदलप्रभः ।

Sampath_eBooks

चतुर्भुजो महाकायः
पीनवक्षा गदाधरः ॥ ५४४ ॥
किरीटी कुण्डली शङ्खी
प्रजापालनतत्परः ।
संसेव्यते स भगवा-
न्निकायैरात्मविक्रमैः ॥ ५४५ ॥

किरीटं मौलिः । गदाशङ्खौ चक्रशार्ङ्गे अप्युपलक्षयतः । आत्मविक्रमैरिति आत्मन इव विक्रमो येषां तैः, निकायैरनुचरसमूहैः संसेव्यते ॥ ५४५ ॥

किंच

विष्णुभक्ताश्च ये नित्यं
ध्यानपूजाजपे रताः ।
ते तु गच्छन्ति तत्स्थानं
विष्णोरमितविक्रमाः ॥ ५४६ ॥

विष्णुभक्ता इति तदाकारोपासापराः ॥५४६

अथ

सप्तकोट्यस्तदूर्ध्वं वै
रुद्रलोको व्यवस्थितः ।

Sampath_eBooks

शुद्धस्फटिकसंकाश-
श्चत्वरोद्यानमण्डितः ॥५४७॥
सहस्रभूमिकाभिश्च
हर्म्यमालाभिरूर्जितः ।
विमानैः पुष्पकैर्युक्तो
हंसकुन्देन्दुनिर्मलैः ॥ ५४८ ॥
वनोपवनषण्डैश्च
सर्वर्तुकुसुमोज्ज्वलैः ।

सोपानवदुपर्युपरिवर्तिचारुदारु···· भूमयो भूमिकाः । पुष्पकैरिति संकल्पमात्रसंचारिभिः । श्रीपरायां तु

'तद्ब्रह्मोर्ध्वं भवेद्विष्णुः स च कोटिचतुष्टयात् ।
षड्भिः स कोटिभिर्देवः शंकरः संस्थितो हरः ॥'

इति । किरणायां तु

'दशषट्कोटयः सत्य··················।'

इत्युक्त्वा

'तस्मादूर्ध्वं भवेद्ब्रह्मा कोटित्रयमितः खग ।
त्रिभिस्तु कोटिभिर्विष्णुश्चतुर्भिस्तु हरः स्थितः ॥'

इति प्रक्रियाभेदो न अवस्थितस्यास्य देवतात्रयस्य संकलय्य दशकोटिदेशत्वानपायाद्विरुद्धः ॥

Sampath_eBooks

अत्र च

मारुताः सुखसंस्पर्शा
वर्तिकर्पूरगन्धयः ॥ ५४९ ॥

एष च

नदीनदह्रदाकीर्णः
पद्मिनीषण्डमण्डितः ।

तथाच

वरेण्या वरदा चैव
वरिष्ठा वरवर्णिनी ॥ ५५० ॥
वसिष्ठा च वराहा च
वरारोहा च सप्तमी ।
गङ्गा ह्येताः समाख्याता
रुद्रलोकवहाः सदा ॥ ५५१ ॥

एताश्च

लक्षपत्रदलाढ्यैश्च
सितपद्मैर्विभूषिताः ।
इन्द्रनीलनिभैर्नालै-
र्योजनायतगन्धिभिः ॥ ५५२ ॥

Sampath_eBooks

दलानि प्रधानपत्राणि, प्रत्येकं लक्षपत्राणीत्यर्थः । उपलक्षितैरित्यर्थः ॥ ५५२ ॥

किंचात्र रुद्रलोके

स्त्रीसहस्रकदम्बाढ्याः
पुष्पप्रकरधूसराः ।
शरदिन्दुनिभा नार्यो
नवनीतसुकोमलाः ॥ ५५३ ॥
सुभ्रूललाटवदनाः
कृशोदर्यो मदालसाः ।
अलिपुञ्जनिभैः केशै-
र्मृगामोदसुगन्धिभिः ॥ ५५४ ॥
प्रलम्बश्रवणाधाराः
पद्मपत्रायतेक्षणाः ।
दाडिमीपुष्पसंकाशै-
रोष्ठैरुत्पलगन्धिभिः ॥ ५५५ ॥
रम्भानिभाभिर्जङ्घाभि-
र्बाहुभिर्बिसकोमलैः ।

Sampath_eBooks

अशोकपल्लवाकारैः
पादैः पद्मदलोपमैः ॥ ५५६ ॥
नखैश्च केतकीप्रख्यै-
र्दशनैर्मौक्तिकोज्ज्वलैः ।
स्वभावसुसुगन्धाढ्यैः
प्रस्रवद्भिरिवामृतम् ॥ ५५७ ॥
हारकेयूरकटकैः
सीमन्तमणिजालकैः ।
काञ्चीडोरैः सुरक्तैश्च
कुसुमैर्भूषिताः सदा ॥ ५५८ ॥

नार्यः स्त्रीसहस्रकदम्बकैः परिवाररूपेणाढ्याः। मृगामोदः कस्तूरिका । श्रवणाधारः कर्णपाली । अशोकपल्लवा लौहित्यस्य, पद्मदलानि तु सौकुमार्यस्य उपमानाय । केतक्यो लोहितराजयः स्वच्छाश्च ॥ ५५८ ॥

किंच

तारकुम्भनिभाकारै-
रुन्नतैश्च पयोधरैः ।

Sampath_eBooks

सुवृत्तैः पीनपार्श्वैश्च
पीनकण्ठसमाश्रितैः ॥ ५५९ ॥
गुरुश्रोणीभराक्रान्ता
मुक्तावलिविराजिताः ।
राजहंसगतिस्पर्धि-
मत्तमातङ्गविभ्रमाः ॥ ५६० ॥
नूपुरारावमुखर-
प्रस्खलन्मृदुविक्रमाः ।
हास्यलास्यविलासाढ्य-
भ्रूभङ्गतरलेक्षणाः ॥ ५६१ ॥
ह्लादयन्तीव गात्राणि
रुद्राणां तन्निवासिनाम् ।

तारं रजतम् । पीने कण्ठे समाश्रितं समाश्रयणं येषां पयोधराणां, तैः । लास्यं सुकुमारं नृत्तं, विलासा लीलाः, हास्यादिभिराढ्याः भ्रूभङ्गतरलेक्षणाश्चेति विशेषणसमासः ॥

Sampath_eBooks

किंच

कामग्रहग्रहाविष्टा
घूर्णन्त्यो मदविह्वलाः ॥५६२॥
परिष्वजनमात्रेण
मोदयन्त्यो गणेश्वरान् ।

कामे संभोगे ग्रहोऽभिनिवेश एव ग्रहो भूतमिति योज्यम् ॥

एवंविधरूपलावण्यशालिन्य एताः

यद्यप्येवंविधा नार्यः

तथापि

निजभर्तृभयातुराः ॥ ५६३ ॥

अस्वैरिण्य इत्यर्थः ॥ ५६३ ॥

अतश्च

वित्रस्तमृगनेत्रास्तु
भर्तुरुत्सङ्गमागताः ।

ईदृश्यश्च

अवगूह्य च सर्वाङ्गै-
रापीय वदनैर्मुखम् ॥ ५६४ ॥

Sampath_eBooks

क्रीडन्ति रुद्रभवने
रुद्रकन्याः सरुद्रकाः ।

किंचात्र

रुद्राश्चैवंविधाकारा
ज्ञानयोगबलोत्कटाः ॥ ५६५ ॥

कामनिष्ठा अपि ज्ञानयोगाभ्यां न परिहीयन्त इत्यर्थः ॥ ५६५ ॥

एते च

मुकुटैः कुण्डलैश्चित्रै-
र्महारत्नसमुज्ज्वलैः ।
केयूरकटकैर्डोरैः
पुष्पवस्त्रविभूषणैः ॥ ५६६ ॥
मुक्ताफलावलीहारै-
र्ब्रह्मसूत्रोत्तरीयकैः ।

उपलक्षिताः सन्तः ॥

महाकाया महोरस्का-
स्त्रिनेत्राः शूलपाणयः ॥५६७॥

Sampath_eBooks

चन्द्रायुतप्रतीकाशाः
कर्पूरक्षोदधूसराः ।
सुरसिद्धनुताः सर्वे
सुप्रसन्ना वरप्रदाः ॥ ५६८ ॥
हरलब्धवरास्तृप्ता
दशबाह्विन्दुमौलयः ।

तेषां च

न तत्र मृत्युर्न जरा
न शोकोऽस्ति वियोगजः ॥५६९॥

अतश्चैते

क्रीडन्ति सार्धं कन्याभिः

न तद्भोगप्रदकर्मक्षये पुनः संसरन्तीत्याह

संसारभयवर्जिताः ।

केवलमेते

अधिकारक्षये रुद्रा
रुद्रकन्यासमावृताः ॥ ५७० ॥
श्रीकण्ठस्येच्छया सर्वे
शिवं यान्ति तनुक्षये ।

Sampath_eBooks

गत्वा भूयो न जायन्ते
कल्पकोटिशतैरपि ॥ ५७१ ॥

इच्छा अत्र अनुजिघृक्षा, तां विनोर्ध्वं सृज्यन्त एवेत्यर्थः ॥ ५७१ ॥

तदित्थम्

एवंविधैरसंख्यातै-
र्विमानरथगामिभिः ।
महावृषगजारूढैः
सिंहवाजिसुवाहनैः ॥ ५७२ ॥
लक्षायुतसहस्रैस्तु
रुद्रकोटिभिरावृतम् ।
तन्मध्ये सर्वतोभद्रं
सिंहद्वारैः सुतोरणैः ॥ ५७३ ॥
स्वच्छमौक्तिकसंकाश-
प्राकारशिखरावृतम् ।
नन्दीश्वरमहाकाल-
द्वारपालगणैर्वृतम् ॥ ५७४ ॥

Sampath_eBooks

किंकिणीजालमुखरैः
पताकाध्वजसंकुलैः ।
वितानच्छत्रषण्डैश्च
मुक्ताहारप्रलम्बितैः ॥ ५७५ ॥
घण्टाचामरशोभाढ्यं
दर्पणैश्चोपशोभितम् ।
कलशैर्द्वारन्यस्तैश्च
रत्नपल्लवसंयुतैः ॥ ५७६ ॥
रचितैश्चित्रशास्त्रज्ञै
रत्नचूर्णसमुज्ज्वलैः ।
स्वस्तिकैः पत्रवल्ल्याढ्यै-
श्चित्रितं भुवनाजिरम् ॥५७७॥
शतसिंहासनाकीर्णं
वेदिकारत्नभूषितम् ।
गोपुराट्टालरथकै-
र्वीथीभिश्च भ्रमान्त्रकैः ॥५७८॥
सर्वरत्नविचित्राढ्यै-
र्द्वारबन्धैः सुशोभनम् ।

Sampath_eBooks

निर्गमैः सुगवाक्षैश्च
विटङ्कैः स्फटिकप्रभैः ॥ ५७९॥
स्तम्भैः सोपानबद्धैश्च
वज्रवैडूर्यसप्रभैः ।
पूर्णचन्द्रनिभाकारै-
रण्डैः शिखरमण्डितैः ॥५८०॥
मुक्ताफलप्रभाभिश्च
भूमिभिश्च सहस्रशः ।
नाट्यशालैः सुशोभाढ्यै-
र्नृत्तगीतरवाकुलैः ॥ ५८१ ॥
मण्डपै रत्नचित्राढ्यैः
सभामण्डलनिर्भरैः ।
आसीनै रुद्रवृन्दैश्च
रुद्रकन्याकदम्बकैः ॥ ५८२ ॥
मत्तवारणकै रम्यै-
श्चन्द्रशालासुशोभनैः ।
धूपितं धूपवर्तीभिः
कुङ्कुमोदकसेचितम् ॥ ५८३ ॥

Sampath_eBooks

चित्रपट्टैस्तु संछन्नं
पुष्पप्रकरसंकुलम् ।
तूर्यशब्दजयध्वान-
काहलाकूजितेन च ॥ ५८४ ॥
वंशवीणामृदङ्गैश्च
गोमुखैर्मुखवादनैः ।
पणवैस्तालवाद्यैश्च
शङ्खभेरीरवेण च ॥ ५८५ ॥
दुन्दुभीनादशब्देन
मुरजस्फालनेन च ।
करस्फोटमहाशब्दैः
सिंहनादप्रगुञ्जितैः ॥ ५८६ ॥
गर्जद्भिर्गणवृन्दैश्च
मेघस्तनितनिःस्वनैः ।
वन्दिनां स्तोत्रशब्देन
सामवेदरवेण च ॥ ५८७ ॥
हुडुक्काराट्टहासैश्च
गेयझांकारयोजितैः ।

Sampath_eBooks

वृषनन्दितशब्देन
गजवाजिरवेण च ॥ ५८८ ॥
काञ्चीनूपुरशब्देन
नदतीव महत्पुरम् ।

नन्दीश्वरमहाकालप्रधाना द्वारपालगणा इति समासः । किंकिणीजालमुखरैरित्यादि वितानच्छत्रषण्डविशेषणम् । मुक्ताहारप्रलम्बितैरिति पूर्वनिपातव्यत्ययः । चित्रशास्त्रज्ञैः कर्तृभिः रत्नचूर्णेन रचिता ये पत्रवल्ल्याढ्याः पत्रलतालंकृताः स्वस्तिकास्तैर्विचित्रम् । तत्र रुद्रभुवने भुवनाजिरं भुवनाङ्गनमिति योज्यम् । वेदिकाभिश्चतुरस्रभूमिकाभिः रत्नैश्च प्राकारस्थैर्भूषितम् । गोपुराणि प्रधानद्वाराणि । अट्टालाः पुरप्राकाराः । रथका रचनाविशेषाः । वीथ्यो विमानसंचारभुवः । भ्रमान्त्रकैः जलप्रवाहप्रणालैः । सर्वरत्नविचित्रत्वाच्च आढ्यैः स्फीतैर्द्वारोपान्तगतैः शोभनम् । निर्गमाः मात्राः (?) । गवाक्षास्तदवलोकनजालकस्थानानि । विटङ्काः स्तम्भशीर्षकाः । अण्डा वर्तुलसंस्थानदेवगृहाः । रत्नरचनाप-

Sampath_eBooks

रिष्कृतं यच्चित्रं तेनाढ्याः । तथा सभास्थानेषु यानि रत्नचूर्णरचितानि मण्डलानि तैर्निर्भरा ये मण्डपास्तैर्युक्तम् । तूर्यं द्विखण्डं ताम्रादिमयं वाद्यम् । काहलास्तु त्रिखण्डाः । गोमुखा तद्वरी । पणवोऽन्तस्तन्त्रीवलयझांकारिणी ढक्का । तालवाद्यं वाद्यशब्दः । दुन्दुभिः कांस्यशब्दः । फनत्कारिणी ढक्का भेरी । गर्जनं सर्वप्राणबलोत्थो नादः । भक्तिवैवश्येनोच्चरन्नान्तरः शब्दो हुडुंकारः । वृषस्य परमेश्वरवाहनाभिमानप्रहर्षोत्थितो नादो नन्दितशब्दस्तेन । काञ्चीनूपुरशब्दो नृत्यद्रुद्रकन्यासंबन्धी । एवमीदृशैः शब्दैः पुरमेव साक्षान्नदतीति ज्ञायते ॥

तदित्थं

सर्वसंपत्करं श्रीम-
च्छङ्करस्य तु मन्दिरम् ॥५८९॥

तन्निवासिनामित्यर्थात् ॥ ५८९ ॥

अत्रासौ भगवान्रुद्रो
ब्रह्मविष्ण्वन्द्रपूजितः ।

Sampath_eBooks

गङ्गया स्नपितो नित्यं
दिव्यवस्त्राम्बरच्छदः ॥ ५९० ॥
पृथिव्या गन्धलिप्ताङ्गः
श्रिया पुष्पैः सुपूजितः ।
सप्तस्वरप्रमुख्यैश्च
सरस्वत्या च संस्तुतः ॥ ५९१ ॥

पृथिवी गन्धगुणा । श्रीः पुष्पाश्रिता । एवं च गङ्गादिदेवता अस्य ब्रह्माण्डस्योपरि वक्ष्यमाणभुवनेभ्यः प्राकाम्यादवतीर्णाः स्वोचितं स्नानादि कुर्वत्योऽन्तरङ्गपरिवाररूपाः ॥ ५९१ ॥

अपिच अस्य देवस्य

पूर्णेन्दुरातपत्रं च
स्वयमेव व्यवस्थितः ।

तस्मिंस्तु

गङ्गा तूत्तरिका च्छत्रे

गङ्गा तु उत्तरिकात्वं प्राकाम्येनाश्रित्य स्थिता ॥

Sampath_eBooks

किंचास्य

सर्वादित्याश्च दीपकाः ॥५९२॥

तथा

पुष्पदन्तगणेशाद्यै-
रासनं तस्य संवृतम् ।

तस्मिंश्चासने

कपिलः कर्कटश्चैव
विमर्दः कङ्कटस्तथा ॥ ५९३ ॥
विक्रमश्च दृढश्चैव
निष्कम्पो निष्कलस्तथा ।
अष्टौ ते हरयः प्रोक्ता-
स्त्रिनेत्रा भूरिविक्रमाः ॥५९४॥
सिंहरूपाः सुतेजस्काः
सटाविकटभास्वराः ।

एतादृशैः

शक्तिरूपधरैर्मन्त्रै-
र्योगैश्वर्यसमन्वितैः ॥ ५९५ ॥

Sampath_eBooks

आसनं विवृतं तैस्तु
महोत्साहैर्बलोत्कटैः ।

अस्य भगवतो ब्रह्माण्डान्तरवस्थितस्यापि परमेव माहात्म्यमिति कृत्वा

'शिवशक्तिमया मन्त्रा न्यस्तव्या वीरवन्दिते ।' (२।६३)

इति पूर्वोक्तभैरवासनवच्छिवशक्तिपरमार्था एव सिंहाः ॥

तत्र भद्रासने रुद्रः
स्थितश्चन्द्रार्धशेखरः ॥ ५९६ ॥

सर्वलक्षणसंपूर्णः
सर्वाभरणभूषितः ।

त्र्यक्षो दशभुजो देवो
जटामुकुटमण्डितः ॥ ५९७ ॥

पीनवक्षःस्थलोरुश्च
पीनस्कन्धो महाभुजः ।

बद्धपद्मासनासीनः
कर्पूरक्षोदधूसरः ॥ ५९८ ॥

---

१ वर० क पाठः ।

Sampath_eBooks

वरदाभयपाणिश्च
सर्वायुधधरस्तथा ।

भद्रं प्रशस्तम् । वरदाभयौ पाणी मुख्यौ । सर्वायुधानि पूर्वोक्तानि खड्गखेटकादीनि ॥

किंच

शतपत्राङ्कितैश्चैव
हस्तपादैः सुकोमलैः ॥ ५९९ ॥
चन्द्रबिम्बनखाभाभि-
रङ्गुलीभिरलंकृतैः ।
सुश्लिष्टजानुगुल्फैश्च
पादैश्चैव समुन्नतैः ॥ ६०० ॥
पूजितैर्गणरुद्रैश्च
ब्रह्मविष्ण्वन्द्रवन्दितैः ।

शतपत्रपद्मचिह्नितहस्तपादत्वादिना दिव्य-लक्षणत्वमुक्तम् । पादैरिति जातौ बहुवचनम्, प्राकाम्यतो वा 'यो विश्वतस्पात्' इति स्थित्या बहुचरणतोऽपि अस्य । इत्थंभूतलक्षणे एतास्तृतीयाः ॥

Sampath_eBooks

किंच

चामरव्यजनोत्क्षेपै
रुद्रस्त्रीभिः समन्ततः ॥ ६०१ ॥
वीजितस्तु सदा श्रीमां-
श्चन्द्रकोटिसमप्रभः ।
ज्ञानामृतसुतृप्तात्मा
योगैश्वर्यप्रदायकः ॥ ६०२ ॥
ध्यातो वै योगिभिर्नित्यं
प्रसन्नवदनेक्षणः ।
प्रहसन्स इवाभाति
निर्मलज्ञानरश्मिभिः ॥ ६०३ ॥
अज्ञानतिमिरं हत्वा
दर्शयेत्परमं वपुः ।
सर्वसौख्यप्रदाता च
रुद्रमातृगणावृतः ॥ ६०४ ॥

ध्यातः सन् परस्वरूपानुप्रवेशात् ज्ञानरश्मिभिः प्रहसन्निवाभाति । अतश्चाज्ञानं हत्वा परं स्वरूपं दर्शयत्येव ॥ ६०४ ॥

Sampath_eBooks

किंच

तस्योत्सङ्गगता देवी
तप्तकाञ्चनसुप्रभा।
पूजिता योगिनीवृन्दैः
साधकैः सुरकिन्नरैः ॥ ६०५ ॥
सर्वलक्षणसंपूर्णा
सर्वाभरणभूषिता।
योगसिद्धिप्रदा नित्यं
मोक्षाभ्युदयदायिका ॥ ६०६ ॥
देवस्याभिमुखी नित्य-
मुमा तु ललितेक्षणा।

परावेशशक्तितद्वन्तावेतदपरं रूपं श्रित्वा ब्रह्माण्डान्तःसृष्टिसंहारौ कुर्वात इत्याह

शक्तिश्चापररूपेण
शक्तिमांश्च हरस्तथा ॥ ६०७ ॥
ब्रह्माण्डे सृष्टिसंहारौ
करोति च शिवेच्छया।

चकारावत्र तुल्ययोगे। तथेत्यपररूपेण।

Sampath_eBooks

चकारः स्थितिविलयानुग्रहान् समुच्चिनोति ।
शिवोऽत्र परमः ॥

किंचेदं

दीक्षाज्ञानविहीना ये
लिङ्गाराधनतत्पराः ॥ ६०८ ॥
ते प्रयान्ति हरस्थानं
सर्वैश्वर्यसुखावहम् ।

अनेनापि क्रमेणास्यानुग्राहकत्वमित्यर्थः ॥

जरामरणनिर्मुक्ता
व्याधिशोकविवर्जिताः ॥६०९॥

ते च

नाधो यान्ति पुनर्देवि
संसारे दुःखसागरे ।

किंतु

शिवं यान्ति ततश्चोर्ध्वं
श्रीकण्ठेन समीक्षिताः ॥ ६१० ॥

तत इति हरस्थानात् । सम्यगीक्षिताः शक्तिपातेनानुगृहीताः । तदेवमस्य पुरस्य भगवदधि-

Sampath_eBooks

ष्ठानादयं महिमा—यत्तत्प्राप्ता नाधो यान्ति, अपितु श्रीकण्ठनाथेन सम्यगनुग्रहदृष्ट्येक्षिता मुच्यन्ते अन्यथा तु ऊर्ध्वोर्ध्वमेव क्रमेण भोगाय सृज्यन्ते ॥ ६१० ॥

इत्थं

रुद्रलोकः समाख्यात-
स्ततश्चोर्ध्वमुमे शृणु ।
उत्तरोत्तरवृद्ध्या च
भुवनं भुवनं स्थितम् ॥ ६११ ॥

वृद्धिः प्रमाणविभवाभ्याम् । सा चाग्रे वक्ष्यते ॥ ६११ ॥

संप्रति तु

ब्रह्माण्डस्याप्यधोभागे
रुद्रलोकस्य चोर्ध्वतः ।
दण्डपाणेः पुरं ज्ञेयं
नानारुद्रगणावृतम् ॥ ६१२ ॥
दण्डपाणिस्तु भगवा-
न्योगैश्वर्यबलान्वितः ।

Sampath_eBooks

दण्डः पाणितलेनैव
धृतो येन शिवेच्छया ॥ ६१३ ॥

रुद्रभट्टारक एवानेन वपुषा स्थितः ॥६१३॥

विवृणोति च ब्रह्माण्डे
मोक्षमार्गं सुदुर्भिदम् ।
विधिनाराधितश्चैव
अनुध्यानाच्छिवेच्छया ॥६१४॥

अनुध्यानमास्थाय विधिनार्चाजपादिरूपेणाराधितः सन् ब्रह्माण्डे मोक्षमार्गं सुदुर्भिदं योगिभिर्महता प्रयत्नेन भेत्तुं शक्यं विवृणोति विगतावरणं करोति ब्रह्माण्डकर्परिकाविभेदनयुक्त्या प्रगुणीकरोति, नतु रुणद्धि। अथच परचैतन्यस्फारात्मा भगवान् रुद्रः स्वशक्तिगतसुस्पष्टीकृतप्राणदण्डप्रयोगेण शरीरगतहृत्प्रदेशाश्रितस्वात्माख्यातिरूपहृद्ग्रन्थ्याख्ये ब्रह्माण्डे मोक्षमार्गं करोति

'हृदये यः स्थितो ग्रन्थिरधऊर्ध्वनियामकः ।'

इत्याम्नाताख्यातिग्रन्थिप्रशमनेन मध्यमार्गगतशक्तिभूमिं

Sampath_eBooks

'...........शैवी मुखमिहोच्यते ।' (वि० भै० २०)

इत्याम्नायोक्तस्थित्या शिवताप्राप्तिहेतुं स्फुटयतीत्यान्तरोऽर्थः, नतु ब्रह्मबिलान्ता ब्रह्माण्डव्याप्तिरिति व्याख्यातव्यम् । एवं हि जलाद्यावरणव्याप्तिर्देहाश्रया न भवेत्

'नाड्याधारस्तु नादो वै भित्त्वा सर्वमिदं जगत् ।
अधःशक्त्या विनिर्गत्य यावद्ब्रह्माणमूर्ध्वतः ॥
नाड्या ब्रह्मबिले लीनस्त्वव्यक्तध्वनिरक्षरः ।
नदते सर्वभूतेषु शिवशक्त्या त्वधिष्ठितः ॥'

(स्व० १०।१२३३)

इत्यादिश्च भाविग्रन्थो भेदव्याप्तिहान्या निर्विषयः स्यात् । यत्तु

'सौषुप्तेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ।' (२।८)

इति श्रीस्पन्दे श्रीगुरुभिर्निबद्धं, तद्ब्रह्मबिलाधिष्ठातृवक्ष्यमाणपञ्चब्रह्मोपलक्षितो यः शक्त्यण्डपर्यन्तोऽध्वा, तदभिप्रायेण स्थितमित्येतद्भ्रान्त्यापि न मुण्डान्ता ब्रह्माण्डव्याप्तिर्व्याख्येयेति यथाव्याकृतमेव भद्रम् ॥ ६१४ ॥

एवं दण्डपाण्यन्ते रुद्रलोके मूर्तिद्वयेनावस्थितो विश्वाधिपतित्वात् मूर्तीशमध्ये पशुपतिर्यः, स रुद्राधिष्ठाता । ये तु अन्ये शर्वा-

Sampath_eBooks

द्यः सप्त मूर्तीश्वरास्ते भूरादिसत्यान्तेषु सप्तसु लोकेष्वधिपतय इत्यादिशति

सप्तलोकेषु ये रुद्रा

अधिपतयः ॥

तान्

कथयामि समासतः ।

तानाह

शर्वो रुद्रस्तथा भीमो
भव उग्रस्तथैव च ॥ ६१५ ॥
महादेवस्तथेशानो
रुद्रलोकाधिपास्त्वमी ।

लोकानां भूरादीनां यथासंख्यमधिपाः ।

अनेनैवाशयेन

निवृत्त्यभ्यन्तरे पृथ्वी शतकोटिप्रविस्तरा ।
तस्यां च भुवनानां च शतमष्टोत्तरावधि ॥ (स्व०४।१०२)

इत्येतद्व्याख्याने कालाग्निः कूष्माण्डो हाटक इति ब्रह्माण्डान्तरधोभागे त्रयः, भूर्लोके शर्वः, सत्यलोकान्ते ब्रह्मा, विष्णुरुद्रौ स्वलोकयोरित्यन्तः सप्त, बही रुद्रशतं, तदुपरि सर्वाधिष्ठाता वीरभद्र इति व्याख्यातम् ॥

यदि भूर्लोकतः सत्यलोकान्तमेते रुद्राः

Sampath_eBooks

पृथग्भुवनदीक्षायां सप्त शोध्याः, तदूर्ध्वं का तर्हि स्थितिरित्याह

ब्रह्मलोके स्थितो ब्रह्मा
विष्णुर्वै वैष्णवे पुरे ॥ ६१६ ॥

ब्रह्मलोको यः प्राग्वत् ब्रह्मासनमित्युक्तः ॥ तथैतदुपरि

रुद्रलोके स्थितो रुद्रः
सर्वेषां नायकः स्मृतः ।

कालाग्न्यादित्रयस्य शर्वादिसप्तकस्य ब्रह्मविष्णवोश्चेत्यर्थः । अयं विश्वाधिपतित्वात् मूर्तीश्वरमध्ये पशुपतिरित्याख्ययोक्तः । एवं च

'अनन्तं चैव कालाग्निं नरकांश्च यथाक्रमम् ।
पातालानि ततश्चोर्ध्वं शोधयेदनुपूर्वशः ॥' (१०।३४७)

इत्युक्तक्रमेण संशोध्यभूरादिसत्यान्तलोकसप्तकशुद्धौ शर्वादीनीशानान्तान् सप्त क्रमेण संशोधयेत् । ततो ब्रह्मविष्णुभुवनशुद्धौ ब्रह्मविष्णू संशोध्याविति भुवनदीक्षायामस्यां भुवनेशशुद्धिविभागो ग्रन्थोपारूढ एव स्थितः । तेन यत् श्रीभुल्लकः अनन्तभुवनात्प्रभृति समस्त-

Sampath_eBooks

द्वीपसमुद्रभूर्लोकान्तं शर्वः, भूर्भुवःस्वर्महःसु रुद्रभीमभवाः, जनस्तपःसत्येषु त्रिमूर्त्तयः, महादेवो विष्णुलोके, रुद्रलोकेऽधिपश्चेशानः शोध्य इति स्वकल्पनयाभिहितवान्, तदुपेक्ष्यमेव ॥

तदेतत्संकलयितुमाह

कालाग्नेर्दण्डपाण्यन्त-
मष्टानवतिकोटयः ॥ ६१७ ॥
योजनानां वरारोहे
त्वध्वायमुपवर्णितः ।
कटाहस्तु अधश्चोर्ध्वं
ब्रह्माण्डस्य वरानने ॥ ६१८ ॥
कोटियोजनमानेन
घनाकारेण संस्थितः ।
पञ्चाशत्कोटयश्चोर्ध्वं
भूपृष्ठात्तु वरानने ॥ ६१९ ॥
पञ्चाशच्च अधो ज्ञेया
योजनानां समन्ततः ।
एवं कोटिशतं ज्ञेयं
पार्थिवं तत्त्वमुच्यते ॥ ६२० ॥

Sampath_eBooks

अधःकटाहाद्यथा भूपृष्ठान्तं पञ्चाशत्, तथा दर्शितम्। भूपृष्ठात्तु ध्रुवान्तं पञ्चदश लक्षाणि, तदूर्ध्वं महर्लोकः पञ्चाशीतिर्लक्षाणि कोटिद्वयं च, जनोलोकः कोट्यष्टकं, तपोलोकः कोटयो द्वादश, सत्यलोकः षोडश, ब्रह्मभुवनं कोटिः, विष्णुलोकः कोटिद्वयं, रुद्रलोकः कोटयः सप्त, ऊर्ध्वकटाहः कोटिरित्यूर्ध्वमपि पञ्चाशत्कोटयः पार्थिवं तत्त्वमिति तत्र यः स्थूल आभोगः, नतु तत्त्वस्यैतावत्येव व्याप्तिरुद्धातदीक्षायां बिन्द्वन्तमपि सूक्ष्मदृशा तद्व्याप्तेर्दर्शितत्वात्। ज्ञेयमुच्यत इति दीक्षाधारणादौ ज्ञातव्यमाचार्यसाधकादिभिरित्यभिधीयते भगवतेत्यर्थः ॥ ६२० ॥

तदेतत्

शतरुद्रावधि ज्ञेयं
सौवर्णं परिवर्तुलम्।
वज्रसाराधिकंसारं[1]
दुर्भेद्यं त्रिदशैरपि ॥ ६२१ ॥

वज्रसारादधिकं सारं यस्य ॥ ६२१ ॥

---

१ ०कं सारं क पाठः ।

Sampath_eBooks

एतच्च मन्त्रनादास्त्रप्रयोगेण दीक्ष्यस्य भेदनीयमित्याह

हुंफट्कारप्रयोगेण
भेदयेत्तु वरानने ।

एवं मान्त्रतेजःस्फारानुप्रवेशेनैव पादाङ्गुष्ठाग्रगतादनन्तभुवनादारभ्य हृदन्तमवस्थितं ब्रह्माण्डं चेद्विदीर्णं, तद्बाह्यमपि तदनुषक्तं दलितमेव भगवतोक्तं भवति ॥

शतरुद्रावधीति यदुक्तं, तद्विभक्तुमाह

शतरुद्रानतो वक्ष्ये
समासेन कृशोदरि ॥ ६२२॥

शतरुद्राभिधेत्थमेषामित्याह

दश दश क्रमेणैव
दशदिक्षु समन्ततः ।
पूर्वादिक्रमयोगेन

यतः स्थितास्तत एते शतरुद्रा उच्यन्त इति शेषः ॥

Sampath_eBooks

तांश्च

कथयाम्यनुपूर्वशः ॥ ६२३ ॥

कपालीशो ह्यजो ब्रध्नो
वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता
पिनाकी त्रिदशाधिपः ॥६२४॥

एते च

इन्द्रस्य बलमाक्रम्य
प्रभुशक्तिसमन्विताः ।
विचरन्ति महादेवा
इन्द्रेण च सुपूजिताः ॥६२५॥

आक्रम्येत्यधिष्ठाय, अत्र हेतुः प्रभोः परभैरवस्य शक्त्या स्वातन्त्र्यात्मनाधिष्ठिताः ईदृशीमुन्मीलितदृक्क्रियाशक्तिमधिकारभूमिं ग्राहिताः, विचरन्ति सृष्ट्यादि कुर्वन्तः क्रीडन्ति। अत एवेन्द्रेण सुष्ठु भक्तिप्रकर्षेण पूज्यन्ते। एवमुत्तरत्रापि योज्यम् ॥ ६२५ ॥

Sampath_eBooks

अग्निरुद्रो हुताशी च
पिङ्गलः खादको हरः ।
ज्वलनो दहनो बभ्रु-
र्भस्मान्तकक्षयान्तकौ ॥ ६२६॥
अग्नेर्बलं समाक्रम्य
प्रभुशक्तिसमन्विताः ।
विचरन्ति महादेवा
अग्निराजसुपूजिताः ॥६२७॥

अग्निराजः आग्नेयदिक्पतिः । एवमन्यत् ६२७

याम्यो मृत्युर्हरो धाता
विधाता कर्तृसंज्ञकः ।
संयोक्ता च वियोक्ता च
धर्मो धर्मपतिस्तथा ॥ ६२८ ॥
यमस्य बलमाक्रम्य
प्रभुशक्तिसमन्विताः ।
विचरन्ति महादेवा
यमराजसुपूजिताः ॥६२९॥

Sampath_eBooks

नैर्ऋतो मारुतो हन्ता
क्रूरदृष्टिर्भयानकः[1] ।
ऊर्ध्वकेशो विरूपाक्षो
धूमलोहितदंष्ट्रकौ ॥ ६३० ॥
नैर्ऋतं बलमाक्रम्य
प्रभुशक्तिसमन्विताः ।
विचरन्ति महादेवा
नैर्ऋतेन्द्रसुपूजिताः ॥६३१॥
बलो ह्यतिबलश्चैव
पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च
दीर्घबाहुर्जलान्तकः ॥६३२॥
मेघनादी सुनादी च
समासात्परिकीर्तिताः ।
वारुणं बलमाक्रम्य
प्रभुशक्तिसमन्विताः ॥ ६३३॥

१ भयान्तकः क पाठः ।

Sampath_eBooks

विचरन्ति महादेवा
वरुणेन्द्रसुपूजिताः ।
शीघ्रो लघुर्वायुवेगः
सूक्ष्मस्तीक्ष्णो भयानकः ॥६३४॥
पञ्चान्तकः पञ्चशिखः
कपर्दी मेघवाहनः ।
वायोस्तु बलमाक्रम्य[1]
प्रभुशक्तिसमन्विताः ॥६३५॥
विचरन्ति महादेवा
वायुराजसुपूजिताः ।
निधीशो रूपवान्धन्यः
सौम्यदेहो जटाधरः ॥६३६॥
लक्ष्मी रत्नधरः कामी
प्रसादश्च प्रभासकः ।
सोमस्य बलमाक्रम्य
प्रभुशक्तिसमन्विताः ॥६३७॥

---

१ श्रित्य क पाठः ।

Sampath_eBooks

विचरन्ति महादेवाः
सोमराजसुपूजिताः ।
विद्याधिपोऽथ सर्वज्ञो
ज्ञानदृग्वेदपारगः ॥ ६३८ ॥
शर्वः सुरेशो ज्येष्ठश्च
भूतपालो बलिः[1] प्रियः ।
ईशानानुमता देवा-
श्चेष्टन्ते सुरपूजिताः ॥६३९॥
विचरन्ति महादेवा
ईशशक्त्या त्वधिष्ठिताः ।
वृषो वृषधरोऽनन्तः
क्रोधनो मारुताह्वयः ॥६४०॥
ग्रसनो डम्बरेशौ च
फणीन्द्रो वज्रदंष्ट्रकः ।
विष्णोस्तु बलमाक्रम्य
प्रभुशक्तिसमन्विताः ॥६४१॥

१ लिप्रि० क पाठः ।

Sampath_eBooks

विचरन्ति महादेवा
अनन्तेन सुपूजिताः ।

ईशानो दिक्पतिरनुमतो दिक्पतित्वेनाभिमतो येषाम् । सुरैः सर्वैः पूजिताः सर्वसिद्धिप्रदत्वात् । विष्णोरित्यधोदिग्गतस्य । अनन्तेनेति सर्वाधोदिगधिष्ठात्रा ॥

ऊर्ध्वदिशि तु

शंभुर्विभुर्गणाध्यक्ष-
स्त्र्यक्षश्च त्रिदशेश्वरः ॥६४२॥
संवाहश्च विवाहश्च
नलो लिप्सुस्त्रिलोचनः ।
ब्रह्मणो बलमाक्रम्य
प्रभुशक्तिसमन्विताः ॥६४३॥
विचरन्ति महादेवा
ब्रह्मणैव सुपूजिताः ।

एषां सर्वेषां मध्यात्

Sampath_eBooks

एकैकस्य सहस्रं तु
परिवारोऽभिधीयते ॥ ६४४ ॥

बृहत्तन्त्रेषु ॥ ६४४ ॥

एते च

शतरुद्रा इति ख्याता
ब्रह्माण्डं व्याप्य संस्थिताः ।

व्याप्येति परिवृत्य ॥

एते च

असंख्याताः सहस्राणि
ये च ऊर्ध्वादिदिग्गताः ॥६४५॥

स्वच्छन्दा विश्वगा देवाः
कल्पमन्वन्तरेष्वपि ।

सहस्रसंख्ययापि संख्यातुमशक्याः । प्रोक्तप्रभुशक्तिसमन्वितत्वात् स्वच्छन्दा अनुग्रहादौ स्वतन्त्राः । नियतशरीरत्वेऽपि विश्वगा व्यापकाः कल्पादिष्वपि च देवा द्योतमानाः ॥

प्रतिदिशं चैते दशदिग्व्यवस्थायां संनिविष्टा इत्याह

Sampath_eBooks

पूर्वादिदशादिग्मुद्राः
स्थिता दश दशैव तु ॥६४६॥
दशानां दशानां
एकैकमधिपं चैव
कथयामि वरानने
स्थितो वै पूर्वतोऽण्डस्य
श्वेतो वै नाम नामतः ॥६४७॥
रुद्राणां तु शतैर्युक्तो
महावीर्यपराक्रमः ।
दीप्तिमद्भिर्महातीव्रै-
र्मयूखैरिव भास्करः ॥ ६४८ ॥
आग्नेय्यामग्निसंकाशो
वैद्युतो नाम विश्रुतः ।
सोऽपि विद्युत्प्रभै रुद्र-
शतैस्तु परिवारितः ॥ ६४९ ॥
याम्येऽण्डस्य महाकालो
युगान्तानलसंनिभः ।

Sampath_eBooks

शतरुद्रैर्वृतो देवि
तिष्ठत्यमितविक्रमैः ॥ ६५० ॥
नैर्ऋते विकटो नाम
शतेन परिवारितः ।
संतिष्ठते महातेजा
द्वितीय इव भास्करः ॥६५१॥

शतेनेति मुख्येन । एवमन्यत्र ॥ ६५१ ॥

पश्चिमेऽण्डस्य यो रुद्रो
महावीर्य इति श्रुतः ।
शतरुद्रैर्वृतः सोऽपि
तिष्ठत्यमितविक्रमः ॥६५२॥
वायव्यदिशि चाण्डस्य
वायुवेगो महाबलः ।
शतेन च वृतः श्रीमां-
स्तिष्ठत्यत्र महाबलः ॥ ६५३ ॥
सुभद्रनामोत्तरतः
शतेन परिवारितः ।

Sampath_eBooks

महावीर्यबलोपेत-
स्तिष्ठत्यत्र महाबलः ॥६५४॥
परिविष्टो मरीचिभि-
स्तत्र तिष्ठति वीर्यवान् ।
विद्याधरो नाम रुद्र
ऐशान्यां वै प्रतिष्ठितः ॥६५५॥
शतरुद्रैर्वृतः सोऽपि
परिविष्ट इवोडुराट् ।
महावीर्यबलोपेत-
स्तिष्ठतेऽनन्तविक्रमः ॥६५६॥

परिविष्टो मरीचिभिः परिवृतः ॥ ६५६ ॥

अधः कालाग्निरुद्रोऽन्यः
स्थितस्त्वत्र द्वितीयकः ।
समावृतो रुद्रशतैः
स्थितैस्त्वत्र वरानने ॥ ६५७ ॥

द्वितीयक इत्यन्तस्थात् कालाग्नेरन्यः ६५७

Sampath_eBooks

शतैः समावृतो रुद्रो
मयूखैरिव भास्करः ।

उपरिष्टात् रुद्र इत्येतदाख्ययाख्यातः ॥
तदित्थं

वीरभद्रो वृतो रुद्रै-
रुपर्यण्डस्य संस्थितः ॥ ६५८ ॥
एकादशो महाकायै
रुद्रक्रोधसमुद्भवैः ।

वृत इत्येतैः श्वेतादिभिरेव पूर्वादिदिग्गत-शतरुद्राधिष्ठातृभिः। एवं मध्यवर्ती वीरभद्र एकादशः। एतैश्च समस्तरुग्द्रावणस्य भगवतो रुद्रस्य संसारवित्रासकारिणः क्रोधादुद्भूतैः। क्रोधसमुद्भव इति पाठो वीरभद्रैकविषयः। यतश्चैते श्वेतादयो वीरभद्रस्य परिवारभूतास्तत एव श्रीपूर्वशास्त्रे

'अनन्तः प्रथमस्तेषां कपालीशस्तथापरः ।
अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च ॥
शीघ्रो निधीश्वरश्चैव सर्वविद्याधिपोऽपरः ।
शंभुश्च····················॥' (मा०वि०५।१४)

Sampath_eBooks

इति प्रतिदिग्गतरुद्रदशकमध्यगमेकैकं रुद्रमुक्त्वा वीरभद्रश्च विधूमज्वलनप्रभ एकादश उक्तः, श्वेतादयस्तु तत्परिवारत्वान्न प्राधान्येन गणिताः ॥

उपसंहरति

एवं तेऽत्र महात्मान
एकैकं तु शतेन च ॥ ६५९ ॥
दशैते वेष्टिता देवि
शतरुद्रैश्च सुव्रते ।

प्रत्येकं शतेन परिवारभूतेन प्रोक्तैश्च कपालीशादिभिरन्तरङ्गैर्दशभिर्वेष्टितः । एवमस्यां विततायां भुवनदीक्षायां सर्व एवैते पार्थिवाण्डगता यथोक्तभुवनेश्वराः शोध्याः नतु प्राक् संक्षिप्तदीक्षोक्तमष्टोत्तरमेव शतमिति न तदाशयेनेदं विपर्यासितव्यं प्रतिपदोक्तस्य विधेः श्रुतिप्रमाणोत्कर्षेण बलवत्त्वादिति । यत्तु श्रीभुल्लकेन अनन्तश्री·········दिभिर्द्वीपादिभिः सह सप्तनवतिः बहिरेकादशेति कल्पितं, तदसदेव ॥

Sampath_eBooks

एते श्वेतादयो दश शतरुद्रपरिवृता अपि एकैकं शतेन परिवृता इति यदुक्तं, तत्संक्षेपाशयेन, विस्तरतस्तु

एषामपरिसंख्येयः
परिवारो महात्मनाम् ॥६६०॥

अतश्चैते सर्वे

आवृत्याण्डं स्थिता ह्येते
मधु यद्वन्मधुव्रताः ।
कदम्बकुसुमं यद्व-
त्केसरैः परिवारितम् ॥६६१॥
परिवारितं तथा ह्यण्डं
रुद्रैरमितविक्रमैः ।

मधुव्रता मधुकराः ॥

तथा

गृहैः सतोरणाट्टालै-
र्नानारत्नविचित्रितैः ॥६६२॥
जाम्बूनदमयैश्चित्रैः
समन्तात्समलंकृतम् ।

Sampath_eBooks

दिव्यनारीभिराकीर्णं
सर्वकामसमन्वितम् ॥ ६६३ ॥
ब्रह्माण्डमेतदाख्यातं
पाशजालावतारितम् ।
जन्मव्याधिजरामृत्यु-
महोदधिपरिप्लुतम् ॥ ६६४ ॥
गुणत्रयमलच्छन्नं
नानाजातिसमाकुलम् ।
पशुज्ञानपरिक्रान्तं
गतित्रयसमाकुलम् ॥ ६६५ ॥

गृहा भुवनानि । आणवादिपाशजालेनावतारितमाच्छादितं जन्मादिपरिप्लुतं चेति तदाश्रयजनाभिप्रायेण । गुणत्रयं सत्त्वादि, तदेव मलम् । जातयश्चतुर्दशविधो भूतसर्गः । पशुज्ञानेन वेदसांख्यादिना परितः समन्तात् क्रान्तं तज्ज्ञानाश्वासबहुलमिति यावत् । गतित्रयं देवमनुष्यतिर्यग्रूपम् ॥ ६६५ ॥

Sampath_eBooks

अत्र च

अनित्या एव गतयः
सर्वेषामेव वादिनाम् ।

गतयो देवमनुष्यतिर्यक्प्रवृत्तयः

'एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥' (भ० गी० ९।२१)

इति नीत्या अनित्याः परिमितकालाः । वादिनामिति वेदसांख्यपुराणेतिहासन्यायवैशेषिकसौगतार्हतादिनिष्ठानाम् ॥

यत एते

परापरविभागं तु
नैव जानन्ति मोहिताः ॥६६६

भेदात्मकं पदमपरम्, अद्वैतं तु परमिति न जानन्ति मायया व्यामूढीकृतत्वात्, अतो भेदपद एव सुरनरतिर्यक्पदानि परापरतया प्राप्याणि मन्यन्ते ॥ ६६६ ॥

अतश्च

हेमाण्डं तु पुरा सृष्टं
क्षयात्म भुवनाकृति ।

Sampath_eBooks

ईशमायासमाविष्टं-
स्यात्मवर्गस्य भूतये ॥६६७॥

यद्यपि समनान्तं क्षययोगि, तथापि यदस्य क्षयात्मत्वमुक्तं तदतिपरिमितकालतया तुच्छताप्रतिपादनाशयेन । समाविष्टस्य क्रोडीकृतस्य । भूतये कर्मोपभोगसिद्ध्यर्थम् ॥६६७॥

गतमेतत्

अथोपरिष्टात्तत्त्वानि
उदकादिशिवान्तकम् ।

उच्यन्त इति शेषः ॥

तत्र मानकलनया एतानि

उत्तरोत्तरयोगेन
दशधा संस्थितानि तु ॥६६८॥

शतकोटिविस्तारात् ब्रह्माण्डात् दशधा गुणितं जलतत्त्वम् । ततो दशगुणं तेजः । ततोऽपि वायुः । ततोऽपि व्योम । ततोऽपि गर्भीकृततन्मात्रेन्द्रिय एव गुणः ॥ ६६८ ॥

---

१ क्रू० क पाठः ।

Sampath_eBooks

अहंकारः

एवंकलितपरिमाणादहंकारात्

तदूर्ध्वं तु

बुद्धिस्तु शतधा स्थिता ।

ततोऽपि

ऊर्ध्वं सहस्रधा ज्ञेयं

प्रधानं वरवर्णिनि ॥ ६६९ ॥

गुणतत्त्वेन सह प्रकृतितत्त्वस्य तत् परिमाणमित्यर्थः ॥ ६६९ ॥

तदुपरि

पौरुषं दशसाहस्रं

ततोऽपि

नियतिर्लक्षधा स्मृता ।

तदूर्ध्वं दश लक्षाणि

कला यावत्तु सुव्रते ॥६७०॥

तदेवंविधात् कलातत्त्वमानादपि

माया तु कोटिधा

Sampath_eBooks

सा च

व्याप्य

स्थिता सर्वं चराचरम् ।

सर्वमिति कलादिक्षित्यन्तम् । एतच्चोपलक्षणपरं सर्वतत्त्वेषु, तेन पृथिव्यादितत्त्वान्युत्तरोत्तरं जलादितत्त्वैः व्याप्तानि । अतश्च शतकोटिविस्तीर्णात् ब्रह्माण्डात् दशगुणं यदप्तत्त्वमुच्यते, तत्तदन्तर्वर्तिना ब्रह्माण्डेन सह । तेन मध्ये ब्रह्माण्डं कोटिशतम्, अधोजलव्लेखिका चत्वारि सर्वाणि कोटिशतानि, जलावरणस्य मानं मध्यवर्तिना व्याख्यातेन ब्रह्माण्डेन सह तु कोटिशतान्येव, सर्वतः पारिवार्तुल्यमानब्रह्माण्डेन अन्तर्वर्तिना दशकोटिशतानि जलावरणमिति स्थित्या तेजस्तत्त्वादीन्यपि अन्तर्वर्तिजलादितत्त्वमानेन सह यथोत्तरं दशादिगुणितानि व्याख्यातव्यानि ॥

तदेवंविधान्मायापरिमाणात्

दशकोटिगुणा विद्या

Sampath_eBooks

सापि व्याख्यातदृष्ट्या ऊर्ध्वाधःकोटिनवकप-
रीमाणा मध्यस्थात्कलामानात्कोटिगुणितात् ॥

मायां व्याप्य व्यवस्थिता ॥६७१॥

अथ ततोऽपि

शतकोटिगुणेनैव
व्याप्तासावीश्वरेण तु

ईश्वरेण ईश्वरतत्त्वेन ॥

ततोऽपि तद्व्याप्यैव स्थितं

सादाख्यं कोटिसाहस्रं
बिन्दुनादं तदूर्ध्वतः ॥६७२॥

सादाख्यं यत् तत्त्वं कोटिसहस्रपरिमाणं, तदेवोर्ध्वत इति तत्रैव अध्वनि ऊर्ध्वभागे पर-व्याप्त्या बिन्दुनादं वक्ष्यमाणबिन्दुनादात्मका-वरणरूपतया स्थितं परं सादाख्यं रूपम् । बिन्दु-ना अर्धचन्द्रनिरोधिकावरणे, नादेन च नादा-न्तावरणमुपलक्षितम् । एतच्चाग्रे व्यक्तीभवि-ष्यति ॥ ६७२ ॥

Sampath_eBooks

अतोऽप्यूर्ध्वे

योजनानां तु वृन्दं वै
शक्तिर्व्याप्य व्यवस्थिता ।

वृन्दं शतकोटिसहस्राणि । शक्तिरिति शक्तितत्त्वम् ॥

अत्रैव च शक्तिसंबन्धिन्यूर्ध्वभागे

व्यापिनी सर्वमध्वानं
व्याप्य देवि व्यवस्थिता ६७३

शक्तिरेव परया व्याख्या परशिवतत्त्वात्मा व्यापिनीरूपा, सर्वमिति शक्तिसदाशिवाद्यधस्तनं समनात्मकं चोर्ध्वमध्वानं व्याप्य स्थिता। एषां च सर्वेषां तत्त्वानां पूर्वमेव स्वरूपं व्याख्यातमिति मायान्तं तत्तत्पदोचितानां क्षेत्रज्ञानां विचित्राणां, विद्यादिव्यापिन्यन्तं तु मन्त्रमन्त्रेश्वरमन्त्रमहेश्वराद्यावर्तेन भेदभिन्नानां रुद्राणामवस्थितिरिति तदपेक्षया तत्र तत्र तथोचितमेव भुवनभोगादिकम् । तदेतदग्रे व्यक्तीकरिष्यति भगवान् ॥ ६७३ ॥